e 1-1. knowing (my) devotion
f (we) depart
g we (will) purify
h 1-1. expanse
i 1-3. rice growing wild
j 1-3. excessively oily
k 1-3. stone
l 1-3. path of the reservoirs
m bark-dress
n 3-3 water of a rivulet
o 1-3. tree
p 7-1. having the stalks of Darbha grass mown
q 1-3. fearless
r 1-1. disturbance

सूतः—

धृताः प्रग्रहाः[a] । अवतरत्वायुष्मान् ।

राजा—(अवतीर्य)

सूत, विनीतवेषेण[b] प्रवेष्टव्यानि तपोवनानि नाम । इदं तावद् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदहमाश्रमवासिनः प्रत्यवेक्ष्योपावर्ते,[c] तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।

सूतः—

तथा ।

(इति निष्क्रान्तः)

राजा—(परिक्रम्यावलोक्य च)

इदमाश्रमद्वारम् । यावत्प्रविशामि ।

(प्रविश्य निमित्तं[d] सूचयन्)

शान्तमिदमाश्रमपदं स्फुरति[e] च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां[f] द्वाराणि भवन्ति सर्वत्र ॥ १६ ॥

नेपथ्ये

इदो इदो सहीओ ।
[इतः इतः सख्यौ] ।

राजा—(कर्णं दत्त्वा)

अये । दक्षिणेन[g] वृक्षवाटिकामालाप इव श्रूयते । यावदत्र गच्छामि । (परिक्रम्यावलोक्य च) अये, एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः[h] सेचनघटैर्बालपादपेभ्यः[i] पयो दातुमित एवाभिवर्तन्ते । (निरूप्य) अहो मधुरमासां दर्शनम् ।

शुद्धान्तदुर्लभमिदं[j] वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः[k] खलु गुणैरुद्यानलता वनलताभिः ॥ १७ ॥

यावदिमां छायामाश्रित्य प्रतिपालयामि[l] ।

(इति विलोकयन् स्थितः)

(ततः प्रविशति यथोक्तव्यापारा[m] सहसखीभ्यां शकुन्तला)

शकुन्तला—

इदो इदो सहीओ ।
[इतः इतः सख्यौ ।]

अनसूया—

हला सउन्दले, तुवत्तो वि तादकस्सवस्स अस्समरुक्खआ पिअदरे त्ति तक्केमि[n] । जेण णोमालिआकुसुमपेलवा[o] वि
[हला शकुन्तले, त्वत्तः अपि तातकाश्यपस्य आश्रमवृक्षाः प्रियतरा इति तर्कयामि । येन नवमालिकाकुसुमपेलवा अपि]

a 1-3. rein
b 3-1. humble dress
c (I) return
d 2-1. omen
e throbs
f 6-3. destiny
g to the right
h 3-3. proportioned to their strength
i 4-3. young plants
j harem
k 1-3. surpassed
l (I) watch
m 1-1. as described
n (I) suppose
o 1-1. tender as the fresh-blown jasmine

X आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् इत्यमरः।

तुमं एदाणं आलवालपूरणे *a* णिउत्ता।
[त्वम् एतेषाम् आलवालपूरणे नियुक्ता।]

शकुन्तला—

हला अणसूए, ण केवलं तादणिओओ *b* एव्व। अत्थि मे सोदर-
[हला अनसूये, न केवलं तातनियोगः एव। अस्ति मे सोदर-
सिणेहो वि एदेसु।
[स्नेहः अपि एतेषु।]

(इतिवृक्षसेचनं रूपयति)

राजा—

कथमियं सा कण्वदुहिता। असाधुदर्शी *c* खलु तत्रभवान् काश्यपो
य इमामाश्रमधर्मे *d* नियुङ्क्ते। न तु कदाचिद् न्ययुङ्क्तेति
इदं किलाव्याजमनोहरं *e* वपु—
स्तपःक्षमं *f* साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया *g*
शमीलतां छेत्तुमृषिर्व्यवस्यति *h* ॥ १८ ॥
भवतु। पादपान्तरित *i* एव विश्वस्तां *j* तावदेनां पश्यामि।

(इति तथा करोति)

शकुन्तला—

सहि अणसूए, अदिपिणद्धेण *k* वक्कलेण पिअंवदाए णिअन्तिद
[सखि अनसूये, अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रिता]
म्हि। सिढिलेहि *l* दाव णं।
[अस्मि। शिथिलय तावद् एनम्।]

अनसूया—

तह।
[तथा।]

(इति शिथिलयति)

प्रियंवदा—(सहासम)

एत्थ पओहर-वित्थारइत्तअं *m* अत्तणो जोव्वणं उवालह *n*।
[अत्र पयोधर-विस्तारयितृकम् आत्मनो यौवनम् उपालभस्व।
मं किं उवालम्भेसि।
[मां किम् उपालभसे।]

राजा—

सम्यगियमाह।
इदमुपहितसूक्ष्मग्रन्थिना *o* स्कन्धदेशे

a 7-1. filling the basins of the trees
b 1-1. father's direction
इत्यभिरामः।
c 1-1. indiscrete
d 7-1. duty (life) of hermitage
e 2-1. artlessly beautiful
f 2-1. fit for penance
g 3-1. edge of the blue-lotous-leaf
h attempts
i 1.1. concealed behind the tree
j 2-1. having no suspicions raised
k 3-1. too tightened
l loosen
m 2-1. that causes the expansion of (your) breasts
n blame
o 3-1. fastened with delicate knots.

स्तनयुगपरिणाहाच्छादिना*a* वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं*b* पाण्डुपत्रोदरेण ॥ १९ ॥

अथवा कामम् अननुरूपमस्या वपुषो वल्कलम् । न*c* पुनरलङ्कारश्रियं न*c* पुष्यति । कुतः–

सरसिजमनुविद्धं शैवलेनापि*d* रम्यं
मलिनमपि हिमांशोर्लक्ष्म*e* लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं*f* नाकृतीनाम् ॥ २० ॥

शकुन्तला—(अग्रतोऽवलोक्य)

एसो वादेरिदपल्लवांगुलीहिं तुवरेदि विअ*g* मं केसर–
[एषः वातेरितपल्लवाङ्गुलीभिः त्वरयति इव मां केशर–]
रुक्खओ । जाव णं सम्भावेमि*h* ।
[वृक्षकः । यावद् एनं सम्भावयामि ।]

(इति परिक्रामति)

प्रियंवदा—

हला सउन्दले, एत्थ एव्व दाव मुहुत्तअं*i* चिट्ठ ।
[हला शकुन्तले, अत्र एव तावत् मुहूर्त्तं तिष्ठ ।]

शकुन्तला—

किं णिमित्तं ?
[किं निमित्तम् ?]

प्रियंवदा—

जाव तुए उवगदाए लदासणाहो*j* विअ अअं केसर–
[यावत् त्वया उपगतया लतासनाथः इव अयं केशर–]
रुक्खओ पडिभादि*k* ।
[वृक्षकः प्रतिभाति ।]

शकुन्तला—

अदो क्खु पिअंवदा*l* सि तुमं ।
[अतः खलु प्रियंवदा असि त्वम् ।]

राजा—

प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा । अस्याः खलु
अधरः किसलयरागः कोमलविटपानुकारिणौ*m* बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्*n* ॥ २२ ॥

अनसूया—

हला सउन्दले, इअं सअंवरवहू*o* सहआरस्स तुए
[हला शकुन्तले, इयं स्वयंवरवधूः सहकारस्य त्वया]

---

a 3-1. concealing the orbs of (her) two breasts

b 1-1. enveloped

c two negatives used to strengthen an affirmative

d 3-1. moss

e 1-1. spot

f 1-1. embellishment

g causes (me) to hasten, as it were

h (1) attend

i for a while, lit. 48 minutes

j 1-1. possessed of a guardian

k looks

l (play upon word) sweet-speaking

m 1-2. resembling tender twigs

n 1-1. pervaded

o 1-1. self-elected wife, see notes also

किदणामहेआ[a] वणजोसिणि त्ति णोमालिआ। एणं
[कृतनामधेया वनज्योत्स्ना इति नवमालिका। एनां]
विसुमरिदा सि ।
[विस्मृता असि।]

शकुन्तला—

तदा अत्ताणं पि विसुमरिस्सं ।
[तदा आत्मानम् अपि विस्मरिष्यामि।]

(लतामुपेत्यावलोक्य च)

हला, रमणीए क्खु काले इमस्स लदापाअवमिहुणस्स[b]
[हला, रमणीये खलु काले अस्य लतापादपमिथुनस्य]
वइअरो[c] संवुत्तो। णवकुसुमजोव्वणा[d] वणजोसिणी। बद्ध-
[व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना। बद्ध-]
पल्लवदाए[e] उवभोअक्खमो सहआरो।
[पल्लवतया उपभोगक्षमः सहकारः।]

(इति पश्यन्ती तिष्ठति)

प्रियंवदा—(सस्मितम्)

अणसूए, जाणासि किं णिमित्तं सउन्दला वणजोसिणिं
[अनसूये, जानासि किं निमित्तं शकुन्तला वनज्योत्स्नाम्]
अदिमेत्तं[f] पेक्खदि त्ति?
[अतिमात्रं प्रेक्षते इति?]

अनसूया—

ण क्खु विभावेमि[g]। कहेहि।
[न खलु विभावयामि। कथय।]

प्रियंवदा—

जधा वणजोसिणी अणुरूवेण[h] पाअवेण सङ्गदा, अवि
[यथा वनज्योत्स्ना अनुरूपेण पादपेन सङ्गता। अपि]
णाम[i] एव्वं अहं पि अत्तणो अणुरूवं वरं[j] लहेअं त्ति।
[नाम एवम् अहम् अपि आत्मनः अनुरूपं वरं लभेय इति।]

शकुन्तला—

एसो णूणं तुह अत्तगदो मणोरहो।
[एषः नूनं तव आत्मगतः मनोरथः।]

(इति कलशमावर्जयति)

a 1-1. named
b pair
c 1-1. union
d 1-1 youthful by (its) fresh blossoms
e 3-1. state of having young shoots just formed
f so much
g (I) understand
h 3-1. suitable
i I wish; would that
j 2-1. husband

राजा—

अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा[a] स्यात्। अथवा कृतं सन्देहेन[b]।

असंशयं क्षत्रपरिग्रहक्षमा[c]
यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु[d]
प्रमाणमन्तःकरणप्रवृत्तयः[e] ॥ २२ ॥

तथापि तत्त्वत एवैनामुपलप्स्ये[f]।

शकुन्तला—(ससम्भ्रमम्)

अम्मो सलिलसेअसम्भमुग्गदो णोमालिअं उज्झिअ
[अहो सलिलसेकसम्भ्रमोद्गतः नवमालिकाम् उज्झित्वा]
वअणं मे महुअरो अहिवट्टदि[g]।
[वदनं मे मधुकरः अभिवर्तते।]

(इति भ्रमरबाधां नाटयति)

राजा—(सस्पृहं विलोक्य)

साधु, बाधनमपि रमणीयमस्याः।

यतो यतः षट्चरणोऽभिवर्तते
ततस्ततः प्रेरितलोललोचना।
विवर्तितभ्रूरियमद्य[h] शिक्षते
भयादकामापि हि दृष्टिविभ्रमम् ॥ २३ ॥

अपि च। (सासूयमिव)

चलापाङ्गां[i] दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव[j] स्वनसि[k] मृदु कर्णान्तिकचरः।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती[l] ॥ २४ ॥

शकुन्तला—

ण एसो धिट्ठो विरमदि[m]। अण्णदो गमिस्सं।
[न एषः धृष्टः विरमति। अन्यतः गमिष्यामि।]

(पदान्तरे स्थित्वा सदृष्टिक्षेपम्)

कहं इदो वि आअच्छदि। हला, परित्ताअध परित्ताअध
[कथम् इतः अपि आगच्छति। हला, परित्रायध्वं परित्रायध्वम्]
मं इमिणा दुव्विणीदेण[n] दुट्ठमहुअरेण अहिहूअमाणं।
[माम् अनेन दुर्विनीतेन दुष्टमधुकरेण अभिभूयमानाम्।]

---

a 1-1. sprung from a wife of different caste, see notes also
b away with doubt
c 1-1. fit to be married to a *Kshatriya*
d In doubtful matters
e unerring guide (towards truth)
f (I will) ascertain
g lit. turns towards, attacks
h 1-1. with frowning brows
i outer-corner of the eye
j like a whisperer of secrets
k (thou) art humming
l 1-1. successful; fortunate
m stops
n 8.1. ill-behaved

उभे—(सस्मितम्)

काओ वअं परित्तादुं । दुस्सन्दं अक्कन्द । राअरक्खिदाइं
[कें आवां परित्रातुम् । दुष्यन्तम् आक्रन्द । राजरक्षितानि]
तवोवणाइं णाम*a* ।
[तपोवनानि नाम ।]

राजा—

अवसरोऽयमात्मानं*b* प्रकाशयितुम् । न भेतव्यम् । (इत्यर्धोक्ते स्वगतम्)
राजभावस्त्वभिज्ञातो*c* भवेत् । भवतु । एवं तावदभिधास्ये ।

शकुन्तला—(पदान्तरे स्थित्वा)

कहं इदो वि मं अणुसरदि ।
[कथम् इतः अपि माम् अनुसरति ।]

राजा—(सत्वरमुपसृत्य)

कः पौरवे वसुमतीं शासति*d* शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं*e* मुग्धासु तपस्विकन्यासु ॥ २५ ॥

(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः)

अनसूया—

अज्ज । ण क्खु किं पि अच्चाहिदं*f* । इअं णो पिअसही
[आर्य । न खलु किम् अपि अत्याहितम् । इयं नौ प्रियसखी]
महुअरेण अहिहूअमाणा कादरीभूदा ।
[मधुकरेण अभिभूयमाना कातरीभूता ।]

(इति शकुन्तलां दर्शयति)

राजा—(शकुन्तलाभिमुखो भूत्वा)

अपि तपो वर्धते*g* ?

(शकुन्तला साध्वसादवचना तिष्ठति)

अनसूया—

दाणिं अदिधिविसेसलाहेण*h* । हला सउन्दले, गच्छ
[इदानीम् अतिथिविशेषलाभेन । हला शकुन्तले, गच्छ]
उडअं*i* । फलमिस्सं अग्घं*j* उवहर । इदं पादोदअं*k*
[उटजम् । फलमिश्रम् अर्घम् उपहर । इदं पादोदकं]
भविस्सदि ।
[भविष्यति ।]

आपः क्षीरं कुशाग्रं च दधि सर्पिः सतण्डुलम् ।
यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्तितः ॥

राजा—

भवतीनां सूनृतयैव*l* गिरा कृतमातिथ्यम् ।

a verily
b 1-1. occasion
c 1-1. royalty
d 7-1. reigning
e 2-1. rudeness
f 1-1. very alarming
g does your penance prosper? (a form of greeting to ascetics)
h distinguished guest
i 2-1. cottage
j 2-1. offering, see notes also
k 1-1. water for washing feet
l 3-1. sweet

प्रियंवदा—

तेण हि इमस्सिं पच्छाअसीअलाए*a* सत्तवण्णवेदिआए
[तेन हि अस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां]
मुहुत्तअं उवविसिअ परिस्समविणोदं*b* करेदु अज्जो ।
[मुहूर्तकम् उपविश्य परिश्रमविनोदं करोतु आर्यः ।]

राजा—

नूनं यूयमप्यनेन कर्मणा परिश्रान्ताः ।

अनसूया—

हला सउन्दले, उइदं णो पज्जुवासणं*c* अदिधीणं ।
[हला शकुन्तले, उचितं नः पर्युपासनम् अतिथीनाम् ।]
एत्थ उवविसम्ह ।
[अत्र उपविशामः ।]

(इति सर्वे उपविशन्ति)

शकुन्तला—(आत्मगतम्)

किं णु क्खु इमं जणं पेक्खिअ तवोवणविरोहिणो*d*
[किं नु खलु इमं जनं प्रेक्ष्य तपोवनविरोधिनः]
विआरस्स*e* गमणीअ म्हि संवुत्ता ।
[विकारस्य* गमनीया अस्मि संवृत्ता ।] *रूपलक्षण विषयानुभवोन्मुखस्यरूपस्य

राजा—(सर्वा विलोक्य)

अहो समवयोरूपरमणीयं*f* भवतीनां सौहार्दम् ।

प्रियंवदा—(जनान्तिकम्)

अणसूए, को णु क्खु एसो । चदुरगम्भीराकिदी महुरं
[अनसूये, को नु खलु एषः । चतुरगम्भीराकृतिः मधुरम्]
आलवन्तो पहाववन्दो*g* विअ लक्खीअदि ।
[आलपन् प्रभाववान् इव लक्ष्यते ।]

अनसूया—

सहि, मम वि अत्थि कोदूहलं*h* । पुच्छिस्सं दाव
[सखि, मम अपि अस्ति कौतूहलम् । प्रक्ष्यामि तावद्]
णं ।
[एनम् ।]

(प्रकाशम्)

अज्जस्स महुरालावजणिदो*i* विस्सासो मं मन्तावेदि ।
[आर्यस्य मधुरालापजनितः विश्वासः मां मन्त्रयति ।]
कदमो अज्जेण राएसिवंसो*j* अलङ्करीअदि । कदमो
[कतमः आर्येण राजर्षिवंशः अलङ्क्रियते । कतमः]

---

a 7-1. cool on account of thick shade

b 2-1. removal of fatigue

c 1-1. sitting by the side of

d 6-1. inconsistent with the penance-grove

e 6-1. emotion

f 1-1. charming by reason of equality of age and appearance

गम्भीर is used metaphorically for one whose thoughts & feelings are deep, reserved, dignified, not emotional

g 1-1 endowed with majesty

h 1-1. curiosity

i 1-1. created by (his) sweet words

j 1-1. race of royal sages

वा विरहपज्जुस्सुअजणो किदो देसो । किं णिमित्तं वा
[वा विरहपर्युत्सुकजनः कृतः देशः । किं निमित्तं वा]
सुउमारदरो वि तवोवणगमणपरिस्समस्स अत्ता पदं
[सुकुमारतरः अपि तपोवनगमनपरिश्रमस्य आत्मा पदम्]
उवणीदो[a] ।
[उपनीतः ।]

शकुन्तला—(आत्मगतम्)

हिअअ, मा उत्तम्म[b] । एसा तुए चिन्तिदं अणसूआ
[हृदय, मा उत्ताम्य । एषा त्वया चिन्तितम् अनसूया]
मन्तेदि ।
[मन्त्रयते ।]

राजा—(आत्मगतम्)

कथमिदानीमात्मानं निवेदयामि । कथं वात्मापहारं[c] करोमि । भवतु । एवं तावदेनां वक्ष्ये । (प्रकाशम्) भवति, यः पौरवेण राज्ञा धर्माधिकारे[d] नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः ।

अनसूया—

सणाहा[e] दाणिं धम्मचारिणो ।
[सनाथाः इदानीं धर्मचारिणः ।]

(शकुन्तला शृङ्गारलज्जां निरूपयति)

सख्यौ—(उभयोराकारं[f] विदित्वा जनान्तिकम्)

हला सउन्दले, जइ एत्थ अज्ज तादो सण्णिहिदो भवे ?
[हला शकुन्तले, यदि अत्र अद्य तातः सन्निहितः भवेत् ?]

शकुन्तला—(सरोषम्)

तदो किं भवे ?
[ततः किं भवेत् ?]

सख्यौ—

इमं जीविदसव्वस्सेण[g] वि अदिधिविसेसं किदत्थं
[इमं जीवितसर्वस्वेन अपि अतिथिविशेषं कृतार्थं]
करिस्सदि ।
[करिष्यति ।]

शकुन्तला—

तुम्हे अवेध[h] । किं पि हिअए करिअ मन्तेध ।
[युवाम् अपेतम् । किम् अपि हृदये कृत्वा मन्त्रयेथे ।]

a Subjected to; exposed

b be not uneasy

c 2-1. concealment of self

d 7-1. supervision of religion

e 1-3. possessed of a guardian

f 6-2. both i.e. Sakuntala and Dushyanta

g 3-1. all the property of (his) life

h be off

ण वो वअणं सुणिस्सं ।
[न वां वचनं श्रोष्यामि ।]

राजा—

वयमपि तावद्भवत्यौ सखीगतं[a] किमपि पृच्छामः ।

सख्यौ—

अज्ज, अणुग्गहो विअ इअं अब्भत्थणा[b] ।
[आर्य, अनुग्रहः इव इयम् अभ्यर्थना ।]

राजा—

भगवान् काश्यपः शाश्वते ब्रह्मणि[c] वर्तते । इयं च वः सखी तदात्मजेति कथमेतत् ?

अनसूया—

सुणादु अज्जो । अत्थि को वि कोसिओ त्ति
[शृणोतु आर्यः । अस्ति कः अपि कौशिकः इति]
गोत्तणामहेओ[d] महप्पभावो राएसी ।
[गोत्रनामधेयो महाप्रभावः राजर्षिः ।]

राजा—

अस्ति, श्रूयते ।

अनसूया—

तं णो पिअसहीए पहवं[e] अवगच्छ । उज्झिआए[f]
[तं नौ प्रियसख्याः प्रभवम् अवगच्छ । उज्झितायाः]
सरीरसंवड्ढणादीहिं तादकस्सवो से पिदा ।
[शरीरसंवर्धनादिभिः तातकाश्यपः अस्याः पिता ।]

राजा—

उज्झितशब्देन जनितं मे कौतूहलम् आ मूलाच्छ्रोतुमिच्छामि[g] ।

अनसूया—

सुणादु अज्जो । गोदमीतीरे पुरा किल तस्स राएसिणो
[शृणोतु आर्यः । गौतमीतीरे पुरा किल तस्य राजर्षेः]
उग्गे तवसि वट्टमाणस्स किं पि जादसङ्केहिं[h] देवेहिं
[उग्रे तपसि वर्तमानस्य किम् अपि जातशङ्कैः देवैः]
मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणी ।
[मेनका नाम अप्सराः प्रेषिता नियमविघ्नकारिणी ।]

राजा—

अस्त्येतदन्यसमाधिभीरुत्वं[i] देवानाम् ।

---

a 2-1. relating to your friend

b 1-1. request

c in perpetual celibacy

a descendant of Kushika गाधिसुतो विश्वामित्रः श्रीरामायणे बालकाण्डे तत्कथानुसन्धेया. गाधिपुरम् कान्यकुब्जनगरम्.

d 1-1. having family name

e 2-1. source, i.e. father

f 6-1. deserted

g from the beginning

h 3-3. alarmed

i 1-1. dread from others' devotion

अनसूया—

तदो वसन्दोदारसमए से उम्मादइत्तअं[a] रूवं पेक्खिअ
[ततः वसन्तावतारसमये अस्याः उन्मादयितृकं रूपं प्रेक्ष्य ।]

(इत्यर्धोक्ते लज्जया विरमति)

राजा—

परस्तादवगम्यत एव[b] । सर्वथाप्सरःसम्भवैषा ।

अनसूया—

अह इं ।
[अथ किम् ।]

राजा—

उपपद्यते ।

मानुषीषु कथं वा स्यादस्य रूपस्य संभवः[c] ।
न प्रभातरलं ज्योतिरुदेति[d] वसुधातलात् ॥ २६ ॥

(शकुन्तलाधोमुखी भूत्वा तिष्ठति)

राजा—(आत्मगतम्)

लब्धावकाशो मे मनोरथः । किन्तु सख्याः परिहासोदाहृतां[e] वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं[f] मे मनः ।

प्रियंवदा—(सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा)

पुणो वि वत्तुकामो[g] विअ अज्जो ।
[पुनर् अपि वक्तुकामः इव आर्यः ।]

(शकुन्तला सखीमङ्गुल्या तर्जयति)

राजा—

सम्यगुपलक्षितं भवत्या । अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम् ।

प्रियंवदा—

अलं विआरिअ । अणिअन्तणाणुओओ[h] तवस्सिअणो णाम ।
[अलं विचार्य । अनियन्त्रणानुयोगः तपस्विजनः नाम ।]

राजा—

सखीं ते ज्ञातुमिच्छामि ।

वैखानसं[i] किमनया व्रतमा प्रदानाद्[j]
व्यापाररोधि मदनस्य निषे[illegible]यम् ।
अत्यन्तमात्मसदृशेक्षणवल्लभाभि–
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥ २७ ॥

a 2-1. ravishing ; lit. intoxicating

b rest could be easily guessed

c 1-1. birth ; possibility

d tremulously radiant flash

e 2-1 uttered in joke

f 1-1 held in suspense (and therefore) anxious

g 1-1 eager to ask

h 1-1 whom questions could be put freely

i 1-1. monastic

j till *her* gift in marriage

प्रियंवदा—

अज्ज, धम्मचरणे वि परवसो अअं जणो । गुरुणो उण
[आर्य, धर्मचरणे अपि परवशः अयं जनः । गुरोः पुनर्]
से अणुरूववरप्पदाणे सङ्कप्पो ।
[अस्याः अनुरूपवरप्रदाने सङ्कल्पः ।]

राजा —(आत्मगतम्)

न दुरवापेयं[a] खलु प्राथना ।
भव हृदय साभिलाषं[b] सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ २८ ॥

शकुन्तला—(सरोषमिव)

अणसूए, अहं गमिस्सं ।
[अनसूये, अहं गमिष्यामि ।]

अनसूया—

किं णिमित्तं ?
[किं निमित्तम् ?]

शकुन्तला—

इमं असम्बद्धप्पलाविणिं[c] पिअंवदं अज्जाए गोदमीए
[इमाम् असम्बद्धप्रलापिनीं प्रियंवदाम् आर्यायै गौतम्यै]
णिवेदइस्सं ।
[निवेदयिष्यामि ।]

अनसूया—

सहि, ण जुत्तं ते अकिदसक्कारम् अदिधिविसेसं विसज्जिअ
[सखि, न युक्तं ते अकृतसत्कारम् अतिथिविशेषं विसृज्य]
सच्छन्ददो[d] गमणं ।
[स्वच्छन्दतो गमनम् ।]

(शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव)

राजा—(ग्रहीतुमिच्छन्निगृह्यात्मानम् । आत्मगतम्)

अहो चेष्टाप्रतिरूपिका[e] कामिनो मनोवृत्तिः । अहं हि
अनुयास्यन्[f] मुनितनयां सहसा विनयेन वारितप्रसरः[g] ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥ २९ ॥

प्रियंवदा—(शकुन्तलां निरुध्य)

हला, ण दे जुत्तं गन्तुं ।
[हला, न ते युक्तं गन्तुम् ।]

a l-l. difficult of realisation
b l-l. hopeful
c errelavant ; nonsense
d of one's own accord
e l-l. dissimilar to (his) gestures
f l-l. about to follow
g l-l. checked from advancing

x Ah! the thoughts passions ... of a lover have their counterpart in his gestures. M. Williams.

शकुन्तला—(सभ्रूभङ्गम्)

किं णिमित्तं ?

[किं निमित्तम् ?]

प्रियंवदा—

रुक्खसेअणाइं दुवे धारेसि मे[a]। एहि दाव। अत्ताणं

[वृक्षसेचने द्वे धारयसि मे। एहि तावत्। आत्मानं]

मोचिअ तदो गमिस्ससि।

[मोचयित्वा ततो गमिष्यसि।]

(इति बलादेनां निवर्तयति)

राजा—

भद्रे, वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये। तथा ह्यस्याः

स्रस्तांसावतिमात्रलोहिततलौ[b] बाहू घटोत्क्षेपणा—

दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः[c]।

बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं

बन्धे स्रंसिनि[d] चैकहस्तयमिताः पर्याकुला[e] मूर्धजाः ॥३०॥

तदहमेनामनृणां करोमि।

(इत्यङ्गुलीयं दातुमिच्छति)

(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः)

राजा—

अलमस्मानन्यथा सम्भाव्य राज्ञः प्रतिग्रहोऽयमिति[f] राजपुरुषं मामवगच्छथ।

प्रियंवदा—

तेण हि णारुहदि एदं अङ्गुलीअअं अङ्गुलीविओअं।

[तेन हि नार्हति एतद् अङ्गुलीयकम् अङ्गुलीवियोगम्।]

अज्जस्स वअणेण अणिरिणा[g] दाणिं एसा।

[आर्यस्य वचनेन अनृणा इदानीम् एषा।]

(किञ्चिद्विहस्य)

हला सउन्दले, मोइदा सि अणुअम्पिणा[h] अज्जेण अधवा

[हला शकुन्तले, मोचिता असि अनुकम्पिना आर्येण अथवा]

महाराएण। गच्छ दाणिं।

[महाराजेन। गच्छ इदानीम्।]

शकुन्तला—(आत्मगतम्)

जइ अत्तणो पहविस्सं[i]।

[यदि आत्मनः प्रभविष्यामि।]

[a] thou owest me

[b] 1-2 having palms exceedingly red

[c] 1-1 more than usual; abnormal

[d] fillet having given way

[e] 1-3 dishevelled

[f] 1-1 present; gift

[g] 1-1 free from debt

[h] 3-1 compassionate

[i] If I have control over myself

(प्रकाशम्)

का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा[a]?

[का त्वं विस्रष्टव्यस्य रोद्धव्यस्य वा?]

राजा—(शकुन्तलां विलोक्य। आत्मगतम्)

किं नु खलु यथा वयमस्यामेवमियमप्यस्मान् प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना[b]। कुतः,

वाचं न मिश्रयति[c] यद्यपि मे वचोभिः
कर्णं ददात्यभिमुखं[d] मयि भाषमाणे।
कामं न तिष्ठति मदाननसम्मुखी सा
भूयिष्ठमन्यविषया[e] न तु दृष्टिरस्याः॥ ३१॥

नेपथ्ये—

भो भोस्तपस्विनः, सन्निहितास्तपोवनसत्त्वरक्षायै भवत। प्रत्यासन्नः किल मृगयाविहारी[f] पार्थिवो दुष्यन्तः।

तुरगखुरहतस्तथा हि रेणु[g]-
र्विटपविषक्तजलार्द्रवल्कलेषु[h]।
पतति परिणतारुणप्रकाशः
शलभसमूह[i] इवाश्रमद्रुमेषु॥ ३२॥

अपि च,

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः[j]
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः[k]।
मूर्तो[l] विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः[m]॥ ३३॥

(सर्वाः कर्णं दत्त्वा किञ्चिदिव संभ्रान्ताः)

राजा—(आत्मगतम्)

अहो धिक् पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति। भवतु। प्रतिगमिष्यामस्तावत्।

सख्यौ—

अज्ज, इमिणा आरण्णअवुत्तन्तेण पज्जाउल म्ह।

[आर्य, अनेन आरण्यकवृत्तान्तेन पर्याकुलाः स्मः।]

अणुजाणादि[n] णो उडअगमणस्स[o]।

[अनुजानीहि नः उटजगमनाय।]

राजा—(ससम्भ्रमम्)

गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न भविष्यति तथा प्रयतिष्यामहे।

(सर्वे उत्तिष्ठन्ति)

[a] what power have you to send me away or to detain me?

[b] or my wish has found free scope

[c] mingles

[d] she lends ear, *i.e.*, listens attentively

[e] for the most part

[f] 1-1 amusing himself with chase

[g] 1-1 dust

[h] branch, bough

[i] 1-1 swarm of locusts

[j] violent blow

[k] creeper

[l] 1-1 embodied

[m] 1-1 terrified at the sight of chariot

[n] permit; allow

[o] cottage. There is no dative case in *Prakrit* and the genitive is used in its place

सख्यौ—

अज्ज, असम्भाविदादिधिसक्कारं[a] भूओ वि पेक्खणणिमित्तं
[आर्य, असम्भावितातिथिसत्कारं भूयः अपि प्रेक्षणनिमित्तं]
लज्जेमो अज्जं विण्णवेदुं।
[लज्जामहे आर्यं विज्ञापयितुम्।]

राजा—

मा मैवम्। दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि[b]।

शकुन्तला—

अणसूए, अहिणवकुससूईए परिक्खदं[c] मे चलणं।
[अनसूये, अभिनवकुशसूच्या परिक्षतं मे चरणम्।]
कुरवअसाहापरिलग्गं[d] च वक्कलं। दाव पडिवालेध[e]
[कुरवकशाखापरिलग्नं च वल्कलम्। तावत् प्रतिपालयत]
मं, जाव णं मोआवेमि।
[माम्, यावद् एतद् मोचयामि।]

(इति राजानमेवावलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता।)

राजा—

मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयात्रिकान्[f] समेत्य नातिदूरे तपोवनस्य निवेशयामि। न खलु शक्नोमि शकुन्तला-व्यापारादात्मानं निवर्तयितुम्[g]। मम हि

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं[h] चेतः।
चीनांशुकमिव* केतोः प्रतिवातं[i] नीयमानस्य ॥ ३४ ॥

(इति निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः ॥

---:o:---

॥ अथ द्वितीयोऽङ्कः ॥

(ततः प्रविशति विषण्णो[j] विदूषकः)

विदूषकः—(निश्वस्य)

भो दिट्ठं। एदस्स मिअआसीलस्स[k] रण्णो वअस्सभावेण
[भोः दिष्टम्। एतस्य मृगयाशीलस्य राज्ञः वयस्यभावेन]
णिव्विण्णो[l] म्हि। अअं मिओ, अअं वराहो[m], अअं
[निर्विण्णः अस्मि। अयं मृगः, अयं वराहः, अयं]
सद्दूलो[n] त्ति मज्झण्णे वि गिम्हविरलपाअवच्छाआसु
[शार्दूलः इति मध्याह्ने अपि ग्रीष्मविरलपादपच्छायासु]

---

a 2-1 who has not received due hospitality
b 1-1 honoured
c 1-1 pricked
d entangled
e wait
f 2-3 follower
g to divert
h 1-1 not being in harmony,
*see notes
i against the wind
j 1-1 dejected
k 1-1 given to chase
l 1-1 disgusted; tired
m 1-1 boar
n 1-1 tiger

वणराईसु[a] आहिण्डीअदि[b] अडवीदो अडविं । पत्तसङ्कर-
[वनराजिषु आहिण्ड्यते अटवीतः अटवीम् । पत्रसङ्कर-]
कसाआणि[c] कडुआणि[d] गिरिणईजलाणि पीअन्ति । अणि-
[कषायाणि कटूनि गिरिनदीजलानि पीयन्ते । अनि-]
अदवेलं[e] सुल्लमंसभूइट्ठो[f] आहारो अण्हीअदि[g] । तुरगाणु-
[यतवेलं शूल्यमांसभूयिष्ठः आहारः अश्यते । तुरगानु-]
धावणकण्डिदसन्धिणो[h] रत्तिम्मि वि णिकामं[i] सइदव्वं ण
[धावनकण्डितसन्धेः रात्रौ अपि निकामं शयितव्यं न]
त्थि । तदो महन्ते जेव पच्चूसे[j] दासीएपुत्तेहिं[k] सउणि-
[अस्ति । ततः महति एव प्रत्यूषे दास्याःपुत्रैः शकुनि-]
लुद्धएहिं[l] वणग्गहणकोलाहलेण पडिबोधिदो[m] म्हि । एत्तएण
[लुब्धकैः वनग्रहणकोलाहलेन प्रतिबोधितः अस्मि । इयता]
दाणिं पि पीडा ण णिक्कमदि[n] । तदो गण्डस्स[o] उवरि
[इदानीम् अपि पीडा न निष्क्रामति । ततः गण्डस्य उपरि]
पिण्डिआ[p] संवुत्ता । हिओ किल अम्हेसु ओहीणेसु[q]
[पिटका संवृत्ता । ह्यः किल अस्मासु अवहीनेषु]
तत्तभवदो मिआनुसारेण अस्समपदं पविट्ठस्स तावस-
[तत्रभवतो मृगानुसारेण आश्रमपदं प्रविष्टस्य तापस-]
कण्णआ सउन्दला णाम मम अधण्णदाए[r] दंसिदा ।
[कन्यका शकुन्तला नाम मम अधन्यतया दर्शिता ।]
सम्पदं णअरगमणस्स मणं कहं पि ण करेदि । अज्ज
[साम्प्रतं नगरगमनाय मनः कथम् अपि न करोति । अद्य]
वि तस्स तं जेव चिन्तअन्तस्स अच्छीसु पभादं
[अपि तस्य ताम् एव चिन्तयतः अक्ष्णोः प्रभातम्]
आसि । का गदी[s] । जाव णं किदाचारपरिकम्मं
[आसीत् । का गतिः । यावद् एनं कृताचारपरिकर्माणं]
पेक्खामि ।
[प्रेक्षे ।]

(इति परिक्रम्यावलोक्य च)

* एसो बाणासणहत्थाहिं[t] जवणीहिं वणपुप्फमालाधारि-
[एषः बाणासनहस्ताभिः यवनीभिः वनपुष्पमालाधारि-]
णीहिं परिवुदो इदो जेव आअच्छदि पिअवअस्सो ।
[णीभिः परिवृतः इतः एव आगच्छति प्रियवयस्यः ।]

a 7-3 path of forest
b imperf. pass. part. आ-हिण्ड् to wander about
c astringent
d 1-3 bitter
e at irregular hours
f roasted on spit
g is eaten
h bruised
i comfortably
j 7-1 dawn
k 3-3 base-born
l bird
m 1-1 awakened
n ceases
o 6-1 boil, eruption
p 1-1 pimple
q 7-3 lagged behind
r 3-1 misfortune
s what remedy?
t seat of arrow; bow

भोदु । अङ्गभङ्गविअलो*a* विअ भविअ चिट्ठिस्सं ।
[भवतु । अङ्गभङ्गविकलः इव भूत्वा स्थास्यामि ।]
जइ एव्वं पि णाम विस्समं*b* लहेअं ।
[यदि एवम् अपि नाम विश्रमं लभेय ।]

(इति दण्डकाष्ठमवलम्ब्य स्थितः)

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा)

राजा—

कामं*c* प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि ।
अकृतार्थेऽपि*d* मनसिजे*e* रतिमुभयप्रार्थना*f* कुरुते ॥ २५ ॥

(स्मितं कृत्वा) एवमात्माभिप्रायसम्भावितेष्टचित्तवृत्तिः*g* प्रार्थयिता विडम्ब्यते*h* । तद्यथा

स्निग्धं वीक्षितमन्यतोऽपि*i* नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्यवरुद्धया यदपि सा सासूयमुक्ता*j* सखी
सर्वं तत्किल मत्परायणमहो*k* कामी*l* स्वतां पश्यति ॥२६॥

विदूषकः—(तथा स्थित एव)

भो वअस्स, ण मे हत्था पसरन्ति । ता वाआमेत्तेण
[भो वयस्य, न मे हस्तौ प्रसरतः । तद् वाचामात्रेण]
जआवीअसि*m* ।
[जाप्यसे ।]

राजा—

कुतोऽयं गात्रोपघातः ?

विदूषकः—

कुदो किल सअं अच्छी आउलीकरिअ*n* अस्सुकारणं
[कुतः किल स्वयम् अक्षिणी आकुलीकृत्य अश्रुकारणं]
पुच्छेसि ?
[पृच्छसि ?]

राजा—

न खल्ववगच्छामि । भिन्नार्थमभिधीयताम्*o* ।

विदूषकः—

भो वअस्स, जं वेदसो खुज्जलीलं*p* विडम्बेदि· तं किं
[भो वयस्य, यद् वेतसः कुब्जलीलां विडम्बयति, तत् किम्]
अत्तणो पहावेण, णं णईवेअस्स*q* ?
[आत्मनः प्रभावेण, ननु नदीवेगस्य ?]

---

a 1-1. troubled by paralysis of limbs
b 2-1 rest
c granted, though
d 7-1 not successful
e 7-1 love
f 2-1 enjoyment
g inferred
h is deluded
i it was looked *i.e.*, looking; glance
j disdainfully
k 1-1 relating to me
l 1-1 lover
m thou art wished victory *i. e.*, greeted
n having troubled
o plainly
p 2-1 imitation of hump-backed person
q 6-1 force of the current

राजा—

नदीवेगस्तत्र कारणम् ।

विदूषकः—

मम वि भवं ।
[मम अपि भवान् ।]

राजा—

कथमिव ?

विदूषकः—

एव्वं रज्जकज्जाणि[a] उज्झिअ एआरिसे अमाणुससञ्चारे[b]
[एवं राज्यकार्याणि उज्झित्वा एतादृशे अमानुषसञ्चारे]
आउलप्पदेसे[c] वणचरवुत्तिणा[d] तुए होदव्वं । जं सच्चं
[आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम् । यत् सत्यं]
पच्चहं सावदाणुसरणेहिं[e] सङ्खोहिअसन्धिबन्धाणं[f] मम
[प्रत्यहं श्वापदानुसरणैः संक्षोभितसन्धिबन्धानां मम]
गत्ताणं अणीसो म्हि संवुत्तो । ता पसादइस्सं[g] विसज्जिदुं
[गात्राणाम् अनीशः अस्मि संवृत्तः । तत् प्रसादयिष्ये विसृष्टुं]
मं एक्काहं पि दाव विस्समिदुं ।
[माम् एकाहम् अपि तावद् विश्रमितुम् ।]

राजा—(स्वगतम्)

अयं चैवमाह । ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं[h] चेतः । कुतः,

न नमयितुमधिज्यमस्मि शक्तो
धनुरिदमाहितसायकं मृगेषु ।
सहवसतिमुपेत्य यैः प्रियायाः
कृत इव मुग्धविलोकितोपदेशः[i] ॥३७॥

विदूषकः—(राज्ञो मुखं विलोक्य)

अत्तभवं किं पि हिअए करिअ मन्तेदि । अरण्णे
[अत्र भवान् किम् अपि हृदये कृत्वा मन्त्रयते । अरण्ये]
मए रुदिअं आसि[j] ।
[मया रुदितम् आसीत् ।]

राजा—(सस्मितम्)

किमन्यत् ? अनतिक्रमणीयं[k] मे सुहृद्वाक्यमिति स्थितोऽस्मि ।

विदूषकः—

चिरं जीव ।
[चिरं जीव ।]

(इति गन्तुमिच्छति)

a 2-3 state affairs 7-1 unfrequented by men
c 7-1 wild region
d forester
e wild beast
f 6-3 with their joints shaken
g I shall beg a favour
h 1-1 disinclined towards hunting
i 1-1 instruction in beautiful glances
j I have wept in the wilderness i. e., my words have fallen on deaf ears
k 1-1 not to be transgressed

राजा—

वयस्य, तिष्ठ । शृणु सावशेषं[a] मे वचः ।

विदूषकः—

आणवेदु भवं ।
[आज्ञापयतु भवान् ।]

राजा—

विश्रान्तेन भवता ममाप्येकस्मिन्ननायासे[b] कर्मणि सहायेन[c] भवितव्यम् ।

विदूषकः—

किं मोदअखाज्जिआए[d] ?
[किं मोदकखादिकायाम् ?]

राजा—

यत्र वक्ष्यामि ।

विदूषकः—

गहीदो खणो[e] ।
[गृहीतः क्षणः ।]

राजा—

कः कोऽत्र भोः ?

दौवारिकः—(प्रविश्य)

आणवेदु भट्टा ।
[आज्ञापयतु भर्ता ।]

राजा—

रैवतक, सेनापतिस्तावदाहूयताम् ।

दौवारिकः—

तधा ।
[तथा ।]

(इति निष्क्रम्य सेनापतिना सह पुनः प्रविश्य)

एसो अण्णावणुक्कण्ठो[f] भट्टा इदो दिण्णदिट्ठी[g] जेव चिट्ठदि ।
[एषः आज्ञापनोत्कण्ठः भर्ता इतः दत्तदृष्टिः एव तिष्ठति ।]
उवसप्पदु अज्जो ।
[उपसर्पतु आर्यः ।]

सेनापतिः—(राजानमवलोक्य)

दृष्टदोषापि[h] स्वामिनि मृगया केवलं गुण एव संवृत्ता ।
तथा हि देवः

a 2-1 with a remainder i.e. unfinished
b 7-1 easy
c 3-1 helper
d eating
e 1-1 opportunity
f 1-1 eager to give orders
g 1-1 with eyes fixed hither
h though found injurious

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं*a*
रविकिरणसहिष्णु*b* क्लेशलेशैरभिन्नम्*c* ।
अपचितमपि*d* गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति ॥३८॥

(उपेत्य) जयतु स्वामी । गृहीतश्वापदमरण्यम्*e* । किमिति स्थीयते ।

राजा—

मन्दोत्साहः कृतोस्मि मृगयापवादिना माठव्येन ।

सेनापतिः—(जनान्तिकम्)

सखे, स्थिरप्रतिबन्धो*f* भव । अहं तावत्स्वामिनश्चित्तवृत्ति-मनुवर्तिष्ये । (प्रकाशम्) प्रलपत्येष वैधेयः*g* । ननु प्रभुरेव निदर्शनम् । पश्यतु देवः ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं*h* भयक्रोधयोः ।
उत्कर्षः*i* स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले*j*
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ॥३९॥

विदूषकः—(सरोषम्)

अवेहि रे उच्छाहहेदुअ । अत्तभवं पकिदिं*k* आपण्णो ।
[अपेहि रे उत्साहहेतुक । अत्रभवान् प्रकृतिम् आपन्नः ।]
तुमं दाव अडवीदो अडविं आहिण्डन्तो णरणासिआलोलु-
[त्वं तावद् अटवीतः अटवीम् आहिण्डन् नरनासिकालोलु-]
वस्स*l* जिण्णरिच्छस्स*m* कस्स वि मुहे पडिस्ससि ।
[पस्य जीर्णर्क्षस्य कस्य अपि मुखे पतिष्यसि ।]

राजा—

भद्र सेनापते, आश्रमसन्निकृष्टस्थिताः*n* स्मः । अतस्ते वचो नाभिनन्दामि*o* । अद्य तावत्

गाहन्तां महिषा निपानसलिलं*p* शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं*q* मृगकुलं रोमन्थमभ्यस्यतु*r* ।
विश्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः*s* पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥ ४० ॥

सेनापतिः—

यत् प्रभविष्णवे*t* रोचते ।

राजा—

तेन हि निवर्तय पूर्वगतान् वनग्राहिणः । यथा न मे सैनिकास्त-पोवनमुपरुन्धन्ति, तथा निषेद्धव्याः ।

a constant flapping
b able to bear
c 2-1 not affected by smallest amount of fatigue
d though reduced
e lit. taken; tracked
f 1-1 firm in opposition
g 1-1 fool
h 1-1 changed
i 1-1 glory
j moving mark
k 2-1 natural state
l greedy
m 6-1 old bear
n vicinity
o I do not approve
p pond; pool
q group
r 2-1 rumination
s 1-1 uprooting of *musta*, a kind of grass
t 4-1 mighty one

शमप्रधानेषु[a] तपोधनेषु
गूढं[b] हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला[c] इव सूर्यकान्ता*-
स्तदन्यतेजोऽभिभवाद्वमन्ति ॥ ४१ ॥

सेनापतिः—

यदाज्ञापयति स्वामी।

विदूषकः—

गच्छ भो दासीएपुत्त। धंसिदो[d] दे उच्छाहवुत्तन्तो।
[गच्छ भोः दास्याःपुत्र। ध्वंसितः ते उत्साहवृत्तान्तः।]

(निष्क्रान्तः सेनापतिः)

राजा—(परिजनं विलोक्य)

अपनयन्तु भवन्तो मृगयावेषम्। रैवतक, त्वमपि स्वं नियोगमशून्यं कुरु[e]।

परिजनः—

जं देवो आणवेदि।
[यद् देवः आज्ञापयति।]

(इति निष्क्रान्तः)

विदूषकः—

किदं भवदा दाणिं णिम्मच्छिअं*। सम्पदं इमस्सिं
[कृतं भवता इदानीं निर्मक्षिकम्। साम्प्रतम् अस्मिन्]
पादवच्छाआविरइदविदाणसणाहे[f] सिलाअले[g] उवविसदु
[पादपच्छायाविरचितवितानसनाथे शिलातले उपविशतु]
भवं। जाव अहं वि सुहासीणो[h] होमि।
[भवान्। यावद् अहम् अपि सुखासीनः भवामि।]

राजा—

गच्छाग्रतः।

विदूषकः—

एदु भवं।
[एतु भवान्।]

(उभौ परिक्रम्योपविष्टौ)

राजा—

माढव्य, अनवाप्तचक्षुःफलोऽसि[i]। येन त्वया द्रष्टव्यानां परं[j] न दृष्टम्।

विदूषकः—

णं भवं अग्गदो मे वट्टदि।
[ननु भवान् अग्रतः मे वर्तते।]

a calmness
b 1-1 hidden
c 1-3 agreeable to touch
* see notes
d 1-1 destroyed
e fill up your office, i.e., stand at the door
* see notes
f canopy
g 7-1 stone-seat
h 1-1 comfortably seated
i thou hast not obtained frui of (thy) eyes
j 1-1 the best

राजा—

सर्वः कान्तमात्मीयं पश्यति । अहं तु तामिवाश्रमललामभूतां[a] शकुन्तलामधिकृत्य ब्रवीमि ।

विदूषकः—(स्वगतम्)

होदु । से अवसरं ण दाइस्सं ।
[भवतु । अस्य अवसरं न दास्यामि]
(प्रकाशम्)

भो वअस्स, जइ सा तवस्सिकण्णआ अणब्भत्थणीआ[b],
[भो वयस्य, यदि सा तपस्विकन्यका अनभ्यर्थनीया,]
ता किं ताए दिट्ठआए ।
[तदा किं तया दृष्टकया ।]

राजा—

सखे, न परिहार्ये[c] वस्तुनि पौरवाणां मनः प्रवर्तते ।

सुरयुवतिसम्भवं* किल मुनेरपत्यं तदुज्झिताधिगतम्[d] ।
अर्कस्योपरि शिथिलं च्युतमिव नवमल्लिकाकुसुमम् ॥ ४२ ॥

विदूषकः—(विहस्य)

जधा कस्स वि पिण्डखज्जूरेहिं[e] उव्वेजिदस्स[f] तिन्ति-
[यथा कस्य अपि पिण्डखर्जूरैः उद्वेजितस्य तिन्ति-]
डिआए[g] अहिलासो भवे, तधा अन्तेउरइत्थिआरअणपरि-
[डिकायाम् अभिलाषः भवेत्, तथा अन्तःपुरस्त्रीरत्नपरि-]
भाविणो[h] भवदो इअं अब्भत्थणा[i] ।
[भाविनः भवतः इयम् अभ्यर्थना ।]

राजा—

न तावदेनां पश्यसि, येनैवमवादीः ।

विदूषकः—

तं क्खु रमणिज्जं, जं भवदो वि विम्हअं[j] उप्पादेदि ।
[तत् खलु रमणीयम्, यद् भवतः अपि विस्मयम् उत्पादयति ।]

राजा—

वयस्य, किं बहुना,

चित्रे निवेश्य परिकल्पितसत्त्वयोगा[k]
रूपोच्चयेन मनसा विधिना कृता नु ।
स्त्रीरत्नसृष्टिरपरा[l] प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य[m] वपुश्च तस्याः ॥ ४३ ॥

विदूषकः—

जइ एव्वं, पच्चादेसो[n] दाणिं रूववदीणं ।
[यदि एवम्, प्रत्यादेशः इदानीं रूपवतीनाम् ।]

a ornament

b 1-1 not fit to be wooed. See notes also

c 7-1 fit to be abandoned

* see notes

d 1-1 found (by *kanva*) when deserted by her (*Menaka*)

e 3-3 date

f 6-1 disgusted

g 7-1 tamarind

h disdaining; slighting

i 1-1 desire

j 2-1 wonder

k 1-1 united with life

l 1-1 unique

m 2-1 ominpotence

n lit. rejection supplanter

राजा—

इदं च मे मनसि वर्तते।

अनाघ्रातं*a* पुष्पं किसलयमलूनं*b* कररुहै*c*-

रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।

अखण्डं पुण्यानां फलमिव च तद्रूपमनघं*d*

न जाने भोक्तारं कमिह समुपस्थास्यति*e* विधिः ॥४४॥

विदूषकः—

तेण हि लहु*f* परित्ताअदु णं भवं। मा कस्स वि

[तेन हि लघु परित्रायतताम् एनां भवान्। मा कस्य अपि]

तवस्सिणो इङ्गुदीतेल्लचिक्कणसीसस्स*g* हत्थे पडिस्सदि।

[तपस्विनः इङ्गुदीतैलचिक्कणशीर्षस्य हस्ते पतिष्यति।]

राजा—

परवती*h* खलु तत्रभवती। न च सन्निहितोऽत्र गुरुजनः।

विदूषकः—

अध भवन्तं अन्तरेण*i* कीदिसो से दिट्ठिराओ?

[अथ भवन्तम् अन्तरेण कीदृशः अस्याः दृष्टिरागः?]

राजा—

निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः*j*। तथापि तु,

अभिमुखे मयि संहृतमीक्षितं*k*

हसितमन्यनिमित्तकृतोदयम्*l*।

विनयवारितवृत्तिरतस्तया*m*

न विवृतो मदनो*n* न च संवृतः ॥ ४५ ॥

विदूषकः—

किं णु क्खु दिट्ठमेत्तस्स तुह अङ्कं*o* आरोहदु?

[किं नु खलु दृष्टमात्रस्य तव अङ्कम् आरोहतु?]

राजा—

मिथःप्रस्थाने पुनः शालीनतयापि*p* ममाविष्कृतो भावस्तत्र-भवत्या। तथाहि

दर्भाङ्कुरेण चरणः क्षत*q* इत्यकाण्डे*r*

तन्वी स्थिता कतिचिदेव पदानि गत्वा।

आसीद्विवृत्तवदना*s* च विमोचयन्ती*t*

शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ ४६ ॥

a 1·1 unsmelled
b 1·1 uninjured
c 3·3 nail
d 1·1 spotless
e will approach
f soon
g greasy
h 1·1 dependant on another
i towards
j naturally
k 1·1 glance
l 1·1 raised from a cause other than love)
m 1·1 with (its) course checked by modesty
n 1·1 love
o 2·1 lap
p 3·1 state of being modest
q 1·1 pricked
r without occasion
s turned backwards
t 1·1 disentangling

विदूषकः—

तेण हि गहीदपाधेओ*a* होहि । किदं तुए उववणं*b*
[तेन हि गृहीतपाथेयो भव । कृतं त्वया उपवनं]
तवोवणं त्ति पेक्खामि ।
[तपोवनम् इति प्रेक्षे ।]

राजा—

सखे, तपस्विभिः कैश्चित् परिज्ञातोऽस्मि । चिन्तय तावत् केनापदेशेन*c* पुनराश्रमपदं गच्छामः ।

विदूषकः—

को अवरो अवदेसो । णं भवं राआ ।
[कः अपरः अपदेशः । ननु भवान् राजा ।]

राजा—

ततः किम् ?

विदूषकः—

णीवारछट्ठभाअं*d* अम्हाणं उवहरन्तु त्ति ।
[नीवारषष्ठभागम् अस्माकम् उपहरन्तु इति ।]

राजा—

मूर्ख, अन्यमेव भागधेयमेते*e* तपस्विनो निर्वपन्ति*f* यो रत्नराशीनपि विहायाभिनन्द्यते*g* । पश्य,

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि*h* तत्फलम् ।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ॥ ४७ ॥

नेपथ्ये—

हन्त*i* सिद्धार्थौ स्वः ।

राजा—(कर्णं दत्त्वा)

अये धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम् ।

दौवारिकः—(प्रविश्य)

जेदु जेदु भट्टा । एदे दुवे इसिकुमारआ पडिहारभूमिं*j* उवट्ठिदा ।
[जयतु जयतु भर्ता । एतौ द्वौ ऋषिकुमारकौ प्रतिहारभूमिम् उपस्थितौ ।]

राजा—

तेन ह्यविलम्बितं*k* प्रवेशय तौ ।

दौवारिकः—

एसो पवेसेमि ।
[एषः प्रवेशयामि]
(इति निष्क्रम्य । ऋषिकुमाराभ्यां सह प्रविश्य)

a provender
b 1-1 pleasure garden
c 3-1 pretext
d 2-1 one sixth of wild rice. See notes also
e 2-1 tribute. Suffix धेय does not change the meaning of the word to which it is added
f pay
g is welcomed
h 1-1 perishable
i an exclamation of pleasure, sorrow etc.
j 2-1 lit. the ground near the porter door
k immediately

इदो इदो भवन्ता।
[इतः इतः भवन्तौ।]

(उभौ राजानं विलोकयतः)

प्रथमः—

अहो दीप्तिमतोऽपि विश्वसनीयता[a] वपुषः। अथवा, उपपन्न-मेतदस्मिन्नृषिकल्पे[b] राजनि। कुतः,

अध्याक्रान्ता[c] वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति[d]।
अस्यापि द्यां[e] स्पृशति वशिनश्चारणद्वन्द्वगीतः[f]
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥४८॥

द्वितीयः—

गौतम, अयं स बलभित्सखो[g] दुष्यन्तः ?

प्रथमः—

अथ किम्।

द्वितीयः—

तेन हि

नैतच्चित्रं यदयमुदधिश्यामसीमां[h] धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति[i]।
आशंसन्ते समितिषु सुराः सक्तवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरहूते[j] च वज्रे ॥४९॥

उभौ—(उपगम्य)

विजयस्व राजन्।

राजा—(आसनादुत्थाय)

अभिवादये भवन्तौ।

उभौ—

स्वस्ति भवते।

(इति फलान्युपहरतः)

राजा—(सप्रणामं परिगृह्य)

आज्ञामिच्छामि।

उभौ—

विदितो भवानाश्रमसदामिहस्थः। तेन भवन्तं प्रार्थयन्ते।

राजा—

किमाज्ञापयन्ति ?

उभौ—

तत्रभवतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि न इष्टिविघ्नमुत्पा-दयन्ति। तत्कतिपयरात्रं[k] सारथिद्वितीयेन भवता सनाथी[l] क्रियतामाश्रम इति।

[a] 1-1 trustworthiness
[b] 7-1 resembling a *Rishi*, but somewhat inferior
[c] 1-1 taken possession of
[d] accumulates
[e] 2-1 heaven
[f] 1-1 sung by pairs of celestial minstrels
[g] *Indra*
[h] 2-1 having the ocean as its dark boundary
[i] tall like a bar or bolt which fastens a gate
[j] 7-1 belonging to *Indra*
[k] for a few nights
[l] 1-1 having a master or a guardian

राजा—

अनुगृहीतोऽस्मि।

विदूषकः—(अपवार्य)

एसा दाणिं अणुऊला दे अब्भत्थणा।
[एषा इदानीम् अनुकूला ते अभ्यर्थना।]

राजा—(स्मितं कृत्वा)

रैवतक, मद्वचनादुच्यतां सारथिः 'सबाणासनं[a] रथमुपस्थापयेति।'

दौवारिकः—

जं देवो आणवेदि।
[यद् देवः आज्ञापयति।]

(इति निष्क्रान्तः)

उभौ—(सहर्षम्)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु[b] दीक्षिताः[c] खलु पौरवाः॥५०॥

राजा—(सप्रणामम्)

गच्छतां पुरो भवन्तौ। अहमप्यनुपदमागत एव।

उभौ—

विजयस्व।

(इति निष्क्रान्तौ)

राजा—

माठव्य, अप्यस्ति ते शकुन्तलादर्शने कुतूहलम्?

विदूषकः—

पढमं सपरिवाहं[d] आसि। दाणिं रक्खसवुत्तन्तेण बिन्दू वि णावसेसिदो[e]।
[प्रथमं सपरिवाहम् आसीत्। इदानीं राक्षसवृत्तान्तेन बिन्दुः]
[अपि नावशेषितः।]

राजा—

मा भैषीः। ननु मत्समीपे वर्तिष्यसे।

विदूषकः—

एसो तव चक्करक्खिभूदो[f] म्हि।
[एषः तव चक्ररक्षीभूतः अस्मि।]

दौवारिकः—(प्रविश्य)

सज्जो रथो भट्टिणो विजअप्पत्थाणं[g] अवेक्खदि। एसो उण
[सज्जः रथः भर्तुः विजयप्रस्थानम् अपेक्षते। एषः पुनर्]

a lit. seat of arrows; bow इष्वासः

b 7-3 sacrifice of exempting the distressed from fear

c 1-3 ordained

d inundation

e is not left

f 1-1 protector of wheel

g 2-1 advance to victory

णअरादो देवीणं[a] आणत्तिहरओ करभओ आअदो ।
[नगरात् देवीनाम् आज्ञप्तिहरः करभकः आगतः ।]

a 6-3 queen-mother. Plural used to show respect

राजा—(सादरम्)

किमम्बाभिः प्रेषितः ?

दौवारिकः—

अध इं ।
[अथ किम् ।]

राजा—

ननु प्रवेश्यताम् ।

दौवारिकः—

तधा ।
[तथा ।]

(इति निष्क्रम्य । करभकेण सह प्रविश्य)
एसो भट्टा । उवसप्प ।
[एषः भर्ता । उपसर्प ।]

करभकः—

जेदु जेदु भट्टा । देवी आणवेदि —'आआमिणि चउत्थ-
[जयतु जयतु भर्ता । देवी आज्ञापयति — आगमिनि चतुर्थ-]
दिअहे पुत्तपिण्डपालणो[b] णाम उववासो[c] भविस्सदि । तहिं
[दिवसे पुत्रपिण्डपालनः नाम उपवासः भविष्यति । तत्र]
दीहाउणा अवस्सं अम्हे सम्भाविदव्वा[d] त्ति ।
[दीर्घायुषा अवश्यं वयं सम्भावयितव्याः इति ।]

b body
c 1-1 fast
d 1-3 ought to be honoured

राजा—

इतस्तपस्विकार्यम् । इतो गुरुजनाज्ञा । द्वयमप्यनतिक्रमणीयम्[e] ।
किमत्र प्रतिविधेयम् ?

e 1-1 not to be transgressed

विदूषकः—

तिसङ्कू* विअ अन्तरा[f] चिट्ठ ।
[त्रिशङ्कुः इव अन्तरा तिष्ठ ।]

* see notes
f in the middle

राजा—

सत्यमाकुलीभूतोऽस्मि ।

कृत्ययोर्भिन्नदेशत्वाद्[g] द्वैधीभवति[h] मे मनः ।
पुरः प्रतिहतं[i] शैलैः स्रोतः स्रोतोवहो यथा ॥२१॥

(विचिन्त्य) सखे, त्वमम्बया पुत्र इति प्रतिगृहीतः[j] । अतो
भवानितः प्रतिनिवृत्य मां तपस्विकार्यव्यग्रमावेद्य तत्र-
भवतीनां पुत्रकृत्यमनुष्ठातुमर्हति ।

g 6-2 duty
h is divided into two
i 1-1 checked
j 1-1 accepted

विदूषकः—

णं क्खु मं रक्खोभीरुअं गरोसि ।
[ननु खलु मां रक्षोभीरुकं गणयसि ।]

राजा—(सस्मितम्)

भो महाब्राह्मण*, कथमेतद्भवति संभाव्यते ?

विदूषकः—

जधा राअाणुएण a गन्तव्वं तधा गमिस्सं ।
[यथा राजानुजेन गन्तव्यं तथा गमिष्यामि ।]

राजा—

ननु तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकांस्त्वयैव सह प्रस्थापयामि ।

विदूषकः—(सगर्वम्)

तेण हि जुवराओ b म्हि दाणिं संवुत्तो ।
[तेन हि युवराजः अस्मि इदानीं संवृत्तः ।]

राजा—(आत्मगतम्)

चपलोऽयं बटुः c । कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत् । भवतु । एनमेवं वक्ष्ये । (विदूषकं हस्ते गृहीत्वा । प्रकाशम्) वयस्य ऋषिगौरवादाश्रमं d गच्छामि । न खलु सत्यमेव तापसकन्यकायां शकुन्तलायां ममाभिलाषः । पश्य,

क्व वयं क्व परोक्षमन्मथो e मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं f सखे परमार्थेन न गृह्यतां वचः ॥५२॥

विदूषकः—

अध इं ।
[अथ किम् ।]

(इति निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

* see notes

a 3-1 younger brother of a king

b 1-1 heir-apparent. See notes also

c 1-1 fellow

d 5-1 reverence for ascetics

e 1-1 having no perception of love; uninfluenced by love

f 1-1 uttered in joke

॥ अथ तृतीयाङ्कादौ विष्कम्भः*॥

(ततः प्रविशति कुशानादाय यजमानशिष्यः)

शिष्यः—

अहो महाप्रभावो राजा दुष्यन्तः, येन प्रविष्टमात्र एवाश्रमं तत्रभवति निरुपप्लवानि*a* नः कर्माणि संवृत्तानि ।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ।
*हुङ्कारेणेव*b* धनुषः स हि विघ्नानपोहति*c* ॥ ५३ ॥

यावदिमान् वेदिसंस्तरणार्थं*d* दर्भानृत्विग्भ्य* उपहरामि । (परिक्रम्यावलोक्य च । आकाशे) प्रियंवदे, कस्येदमुशीरानुलेपनं*e* मृणालवन्ति च नलिनीपत्राणि नीयन्ते ? (श्रुतिमभिनीय) किं ब्रवीषि — 'आतपलङ्घनाद् बलवद् अस्वस्था शकुन्तला । तस्याः शरीरनिर्वापणायेति*f*।' प्रियंवदे, यत्नादुपचर्यताम् । सा हि तत्रभवतः कुलपतेरुच्छ्वसितम्*g* । अहमपि तावद्वैतानिकं*h* शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि ।

(इति निष्क्रान्तः)

॥ इति विष्कम्भः ॥

॥ अथ तृतीयोऽङ्कः ॥

(ततः प्रविशति समदनावस्थो*i* राजा)

राजा—(सचिन्तं निश्वस्य)

जाने तपसो वीर्यं*j* सा बाला परवतीति मे विदितम् ।
न च निम्नादिव*k* सलिलं निवर्तते मे ततो हृदयम् ॥५४॥

भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते*l* कामिजनसार्थः*m* । कुतः,

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं*n* दृश्यते मद्विधेषु ।
विसृजति*o* हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारी करोषि ॥५५॥

भगवन् कामदेव, न ते मय्यनुक्रोशः*p* । (मदनबाधां निरूप्य) कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत् । आं ज्ञातम् ।

अद्यापि नूनं हरकोपवह्नि*q*-
स्त्वयि ज्वलत्यौर्व*r* इवाम्बुराशौ ।
त्वमन्यथा मन्मथ मद्विधानां
भस्मावशेषः*s* कथमित्थमुष्णः ॥ ५६ ॥

* see notes

a 1-3 free from molestation

b 3-1 roar
c dispels
d for strewing on the altar
* see notes
e 1.1 ointment of *Usira*, a kind of fragrant grass

f 4-1 cooling

g 1.1 breath; life
h 2-1 belonging to the sacrifice called *Vitana*

i 1-1 in the state of one in love

j 2-1 potency
k 5-1 low land

l is deceived
m 1.1 host of lovers

n 1-1 untrue

o emits

p 1-1 pity; compassion

q 1-1 fire of Siva's wrath. see notes also
r 1-1 submarine fire
s 1-1 nothing left but ashes

अथवा

अनिशमपि*a* मकरकेतुर्मनसोरुजमावहन्नभिमतो मे ।
यदि मदिरायतनयनां*b* तामधिकृत्य प्रहरतीति ॥ ५७ ॥

भगवन् कन्दर्प, एवमुपालब्धस्य*c* ते न मां प्रत्यनुक्रोशः ।

वृथैव सङ्कल्पशतैरजस्त्र*d*–
मनङ्ग नीतोऽसि मया विवृद्धिम् ।
आकृष्य चापं श्रवणोपकण्ठे*e*
मय्येव युक्तस्तव बाणमोक्षः ॥ ५८ ॥

(सखेदं परिक्रम्य) क्व नु खलु संस्थिते*f* कर्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं*g* विनोदयामि । (निःश्वस्य) किं नु खलु मे प्रियादर्शनादृते शरणमन्यत् । यावदेनामन्विष्यामि । (सूर्यमवलोक्य) इमामुग्रातपां*h* वेलां प्रायेण लतावलयवत्सु*i* मालिनीतीरेषु ससखीजना शकुन्तला गमयति*j* । तत्रैव तावद्गच्छामि । (परिक्रम्यावलोक्य च) अनया बालपादपवीथ्या*k* सुतनुरचिरं गतेति तर्कयामि । कुतः,

सम्मीलन्ति न तावद् बन्धनकोषास्तयावचितपुष्पाः*l* ।
क्षीरस्निग्धाश्चामी*m* दृश्यन्ते किशलयच्छेदाः ॥ ५९ ॥

(स्पर्शं रूपयित्वा) अहो प्रवातसुभगोऽयमुद्देशः*n* ।

शक्यमरविन्दसुरभिः कणवाही*o* मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं*p* पवनः ॥ ६० ॥

(परिक्रम्यावलोक्य च) अस्मिन् वेतसपरिक्षिप्ते*q* लतामण्डपे सन्निहितया तया भवितव्यम् । तथा हि । (अधो विलोक्य)

अभ्युन्नता पुरस्तादवगाढा*r* जघनगौरवात्पश्चात् ।
द्वारेऽस्य पाण्डुसिकते*s* पदपङ्क्तिर्दृश्यतेऽभिनवा ॥ ६१ ॥

यावद् विटपान्तरेणावलोकयामि ।

(परिक्रम्य । तथा कृत्वा । सहर्षम्) अये लब्धं नेत्रनिर्वाणम्*t* । एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते*u* । भवतु । श्रोष्याम्यासां विस्रम्भकथितानि*v* ।

(इति विलोकयन् स्थितः)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)

(सहयावुपवीजयतः)

सख्यौ —(उपवीज्य । सस्नेहम्)

हला सउन्दले, अवि सुहाअदि दे णलिणीवत्तवादो ?
[हला शकुन्तले, अपि सुखायते ते नलिनीपत्रवातः ?]

---

a incessantly
b 2·1 having intoxicating (and) long eyes
c 6·1 reproached
d 3·3 hundreds of desires
e near
f 7·1 finished
g 2·1 weary with fatigue
h 2·1 intensely hot
i 7·3 dotted with bowers of creepers
j passes
k 3·1 avenue of young trees
l 1·3 cavity of flower-stalk
m 1·3 smeared with milky juice
n 1·1 pleasant because of fresh breeze
o spray
p 3·3 inflamed by the bodiless one, *i.e.*, *Kamadeva*
q rattan
r 1·1 depressed
s sand
t 1·1 full bliss of eyes
u is attended
v 2·3 friendly talk

शकुन्तला—
किं वीजअन्ति मं सहीओ।
[किं वीजयतः मां सख्यौ।]

(सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः)

राजा—
बलवदस्वस्थशरीरा शकुन्तला दृश्यते। (सवितर्कम्) तत्किमय-
मातपदोषः स्यात्, उत यथा मे मनसि वर्तते। (साभिलाषं निर्वर्ण्य)
अथवा कृतं सन्देहेन।

स्तनन्यस्तोशीरं^{a} प्रशिथिलमृणालैकवलयं^{b}
प्रियायाः साबाधं^{c} तदपि कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयो^{d}-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥६२॥

प्रियंवदा—(जनान्तिकम्)
अणसूए तस्स राएसिणो पढमदंसणादो^{e} आरहिअ पज्जुस्सुआ
[अनसूये, तस्य राजर्षेः प्रथमदर्शनाद् आरभ्य पर्युत्सुका]
विअ सउन्दला। किं णु क्खु से तण्णिमित्तो अअं
[इव शकुन्तला। किं नु खलु अस्याः तन्निमित्तः अयम्]
आतङ्को^{f} भवे।
[आतङ्कः भवेत्।]

अनसूया—
सहि, मम वि ईदिसी आसङ्का हिअअस्स। होदु। पुच्छिस्सं
[सखि, मम अपि ईदृशी आशङ्का हृदयस्य। भवतु। प्रक्ष्यामि]
दाव णं। (प्रकाशम्) सहि, पुच्छिदव्वा सि किं पि।
[तावद् एनाम्। सखि, प्रष्टव्या असि किम् अपि।]
बलिअं क्खु दे सन्दावो।
[बलीयान् खलु ते सन्तापः।]

शकुन्तला—(पूर्वार्धेन शयनादुत्थाय^{g})
हला, किं वत्तुकामा सि।
[हला, किं वक्तुकामा असि।]

अनसूया—
हला सउन्दले, अणब्भन्तरा^{h} क्खु अम्हे मदणगदस्स^{i}
[हला शकुन्तले, अनभ्यन्तरे खलु आवां मदनगतस्य]
वुत्तन्तस्स। किन्तु, जादिसी इदिहासणिबन्धेसु^{j} काम-
[वृत्तान्तस्य। किन्तु, यादृशी इतिहासनिबन्धेषु काम-]

a 1-1 having *Usira* applied to the bosom
b bracelet
c 1.1 disordered
d 6-2 prevalence of love and hot season
e 5-1 first sight
f 1-1 malady
g half-rising from her bed
h 1-2 ignorant
i 6 1. relating to love
j 7-3 legendary tales

अमाणाणं*a* अवत्था सुणीअदि तादिसिं दे पेक्खामि।
[यमानानाम् अवस्था श्रूयते तादृशीं ते प्रेक्षे।]
कहेहि, किं णिमित्तं दे सन्दावो? विआरं क्खु परमत्थदो
[कथय, किं निमित्तं ते सन्तापः? विकारं खलु परमार्थतः]
अजाणिअ अणारम्भो पडिआरस्स*b*।
[अज्ञात्वा अनारम्भः प्रतिकारस्य।]

राजा—

अनसूययापि मदीयस्तर्कोऽवगतः।

शकुन्तला—(आत्मगतम्)

बलिअं क्खु मे अहिणिवेसो*c* दाणिं पि। सहसा
[बलीयान् खलु मे अभिनिवेशः इदानीम् अपि। सहसा]
एदाणं ण सक्कणोमि णिवेदिदुं।
[एतयोः न शक्नोमि निवेदितुम्।] निवेदयितुम्

प्रियंवदा—

सहि सउन्दले, सुट्ठु एसा भणादि। किं अत्तणो आतङ्कं
[सखि शकुन्तले, सुष्ठु एषा भणति। किम् आत्मनः आतङ्कम्]
उवेक्खसि। अणुदिअहं क्खु परिहीअसि अङ्गेहिं*d*। केवलं
[उपेक्षसे। अनुदिवसं खलु परिहीयसे अङ्गैः। केवलं]
लावण्णमई छाआ*e* तुमं ण मुञ्चदि।
[लावण्यमयी छाया त्वां न मुञ्चति।]

राजा—

अवितथमाह*f* प्रियंवदा। तथा हि

> क्षामक्षामकपोलमाननमुरः*g* काठिन्यमुक्तस्तनं
> मध्यः*h* क्लान्ततरः प्रकामविनतावंसौ*i* छविः पाण्डुरा।
> शोच्या*j* च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
> पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥६३॥

शकुन्तला—

सहि, कस्स वा अण्णस्स कधइस्सं। किन्तु आआस-
[सखि, कस्य वा अन्यस्य कथयिष्यामि। किन्तु आयास-]
इत्तिआ*k* दाणिं वो भविस्सं।
[यित्री इदानीं वां भविष्यामि।]

उभे—

अदो एव्व क्खु णिब्बन्धो*l*। सिणिद्धजणसंविभत्तं*m* हि दुक्खं
[अतः एव खलु निर्बन्धः। स्निग्धजनसंविभक्तं हि दुःखं]

a 6-3 love-sick people
b 6-1 remedy
c 1-1 attachment
d thou art abandoned by thy limbs; thy limbs are wasting away
e 1-1 lovely complexion
f not untrue; true
g 1-1 having cheeks excessively emaciated
h 1-1 waist
i 1-2 shoulder
j 1-1 deplorable tormented by love
k 1-1 troublesome
l 1-1 importunity
m 1-1 shared by affectionate friends

सज्झवेदणं[a] होदि ।
[सह्यवेदनं भवति।]

राजा—

पृष्टा जनेन समदुःखसुखेन[b] बाला
नेयं[c] न[c] वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रान्तरे श्रवणकातरतां* गतोऽस्मि ॥ ६४ ॥

शकुन्तला—

सहि, जदो पहुदि मम दंसणपहं आअदो सो तवोवण-
[सखि, यतः प्रभृति मम दर्शनपथम् आगतः सः तपोवन-]
रक्खिदा राएसी ।
[रक्षिता राजर्षिः ।]

(इत्यर्धोक्तेन लज्जां नाटयति)

उभे—

कधेदु पिअसही ।
[कथयतु प्रियसखी ।]

शकुन्तला—

तदो पहुदि तग्गदेण अहिलासेण एतदवत्थ म्हि संवुत्ता ।
[ततः प्रभृति तद्गतेन अभिलाषेण एतदवस्था अस्मि संवृत्ता ।]

राजा—(सहर्षम्)

श्रुतं श्रोतव्यम् ।

स्मर एव तापहेतुर्निर्वापयिता[d] स एव मे जातः ।
दिवस इवाभ्रश्यामस्तपात्यये[e] जीवलोकस्य ॥६५॥

शकुन्तला—

तं जइ वो अणुमदं, तधा वट्टध, जधा तस्स राएसिणो
[तद् यदि वाम् अनुमतम्, तथा वर्तेथाम्, यथा तस्य राजर्षेः]
अणुकम्पणिज्जा होमि । अण्णधा अवस्सं सिञ्चध
[अनुकम्पनीया भवामि । अन्यथा अवश्यं सिञ्चतं]
मे तिलोदअं[f] ।
[मे तिलोदकम् ।]

राजा—

संशयोच्छेदि[g] वचनम् ।

प्रियंवदा—(जनान्तिकम्)

अणसूए, दूरगअमम्मधा[h] अक्खमा इअं कालहरणस्स ।
[अनसूये, दूरगतमन्मथा अक्षमा इयं कालहरणस्य ।]

[a] 1-1 of bearable pain

[b] 3-1 who shares her pains and pleasures

[c] two negatives used to strengthen the affirmative

* see notes

[d] 1-1 cooler

[e] 7-1 end of the hot season

[f] otherwise most certainly pour out for me water mixed with sesamum-seed. see notes also

[g] 1-1 remover of doubts

[h] 1-1 far gone in love

encouraged the advances of her lover with लज्जा, कंपन, स्निग्धवीक्षित, मृदुभाषित and दूतीसम्प्रेषणम्.

cp. तपति के ... Ratnavali

anxiety

स्वर्श्याम इति राघवभट्टः पाठः

ग्रीष्मान्ते

cp. दूरारूढोऽस्याः प्रणयः Vikrama.

जस्सिं बद्धभावा एसा*a*, सो ललामभूदो पोरवाणं।
[यस्मिन् बद्धभावा एषा, सः ललामभूतः पौरवाणाम्।]
ता जुत्तं से अहिलासो अहिणन्दिदुं।
[तद् युक्तम् अस्याः अभिलाषः अभिनन्दितुम्।]

अनसूया —

तधा जधा भणासि।
[तथा यथा भणसि।]

प्रियंवदा—(प्रकाशम्)

सहि, दिट्ठिआ, अणुरूवो से अहिणिवेसो। साअरं
[सखि, दिष्ट्या, अनुरूपः अस्याः अभिनिवेशः। सागरं]
वज्जिअ कहिं वा महाणई ओदरदि। को दाणिं
[वर्जयित्वा कुत्र वा महानदी अवतरति। कः इदानीं]
सहआरं अन्तरेण अदिमुत्तलदं पल्लविदं*b* सहेदि।
[सहकारम् अन्तरेण अतिमुक्तलतां पल्लवितां सहते।]

राजा —

किमत्र चित्रम्। यदि विशाखे शशाङ्कलेखामनुवर्तेते*।

अनसूया —

को उण उवाओ भवे, जेण अविलम्बिअं णिहुअं*c*
[कः पुनर् उपायः भवेत्, येन अविलम्बितं निभृतं]
अ सहीए मणोरहं सम्पादेम्ह।
[च सख्याः मनोरथं सम्पादयावः।]

प्रियंवदा —

णिहुअं त्ति चिन्तणिज्जं भवे। सिग्घं त्ति सुअरं।
[निभृतम् इति चिन्तनीयं भवेत्। शीघ्रम् इति सुकरम्।]

अनसूया—

कधं विअ।
[कथम् इव।]

प्रियंवदा—

णं सो राएसी इमस्सिं सिणिद्धदिट्ठीए सूइदाहिलासो
[ननु सः राजर्षिः अस्यां स्निग्धदृष्ट्या सूचिताभिलाषः]
इमाइं दिअहाइं पजाअरकिसो*d* लक्खीअदि।
[इमानि दिवसानि प्रजागरकृशो लक्ष्यते।]

राजा—(आत्मानमवलोक्य)

सत्यमित्थंभूत एवास्मि। तथा हि

a in whom she has fixed her affections

b 2-1 sprouted

* see notes

c secretly

d 1-1 emaciated by sleeplessness

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं *a*
निशि निशि भुजन्यस्तापाङ्गप्रवर्तिभिरश्रुभिः।
अनतिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं*b* स्रस्तं स्रस्तं मया प्रतिसार्यते ॥६६॥

प्रियंवदा—(विचिन्त्य)

हला, मअणलेहो*c* से करीअदु। इमं देवदासेसावदेसेण*d*
[हला, मदनलेखः अस्याः क्रियताम्। इमं देवताशेषापदेशेन]
सुमणोगोविदं*e* करिअ से हत्थअं पावइस्सं।
[सुमनोगोपितं कृत्वा अस्य हस्तं प्रापयिष्यामि।]

अनसूया—

रोअदि मे सुउमारो पओओ। किं वा सउन्दला भणादि ?
[रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति ?]

शकुन्तला—

सहीणिओओ वि विकप्पीअदि*f* ?
[सखीनियोगः अपि विकल्प्यते ?]

प्रियंवदा—

तेण हि अत्तणो उवण्णासपुव्वं*g* चिन्तेहि दाव किं पि
[तेन हि आत्मनः उपन्यासपूर्वं चिन्तय तावत् किम् अपि]
ललिदपदबन्धणं*h*।
[ललितपदबन्धनम्।]

शकुन्तला —

हला, चिन्तेमि अहं। अवहीरणाभीरुअं*i* पुणो वेवदि*j*
[हला, चिन्तयामि अहम्। अवधीरणाभीरुकं पुनः वेपते]
मे हिअअं।
[मे हृदयम्।]

राजा—(सहर्षम्)

अयं स ते तिष्ठति सङ्गमोत्सुको*k*
विशङ्कसे भीरु यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया*l* दुरापः कथमीप्सितो भवेत् ॥६७॥

सख्यौ—

अयि अत्तगुणावमाणिणि*m*, को दाणिं सरीरणिव्वावइत्तिअं
[अयि आत्मगुणावमानिनि, कः इदानीं शरीरनिर्वापयित्रीं]
सारदिअं जोसिणिं पडन्तेण*n* वारेदि।
[शारदीं ज्योत्स्नां पटान्तेन वारयति।]

---

a 1·1 having its jewels made colourless

b 1·1 gold bracelet

c 1·1 love-letter

d under the pretext of the remains of an offering made to gods

e 2·1 hidden under flowers

f can a friend's suggestion have any other alternative ?

g preceeded by an allusion to yourself

h 2·1 pretty composition in verse

i 1·1 afraid of being rejected

j flutters

k 1·1 pining for union

l 3·1 goddess of beauty and fortune

m 8·1 o you who undervalue your own merits

n 3·1 skirt of garment

शकुन्तला—(सस्मितम्)
णिओइदा दाणिं म्हि^{a}।
[नियोजिता इदानीम् अस्मि।]

(इत्युपविष्टा चिन्तयति)

राजा—
स्थाने खलु विस्मृतनिमेषेण^b चक्षुषा प्रियामवलोकयामि। यतः,

उन्नमितैकभ्रूलतमाननमस्याः^{c} पदानि^{d} रचयन्त्याः।
कण्टकितेन^e प्रथयति मय्यनुरागं कपोलेन ॥६८॥

शकुन्तला—
हला, चिन्तिदा मए गीदिआ। ण क्खु सण्णिहिदाणि उण
[हला, चिन्तिता मया गीतिका। न खलु सन्निहितानि पुनः]
लेहणसाहणाणि^{f}।
[लेखनसाधनानि।]

प्रियंवदा—
इमस्सिं सुओदरसुउमारे^{g} णलिणीपत्ते णहेहिं णिक्खित्तवण्णं^{h}
[अस्मिन् शुकोदरसुकुमारे नलिनीपत्रे नखैः निक्षिप्तवर्णं]
करेहि।
[कुरु।]

शकुन्तला—(यथोक्तं रूपयित्वा)
हला, सुणध दाणिं सङ्गदत्थं^{i} ण वत्ति।
[हला, शृणुत इदानीं सङ्गतार्थं न वेति।]

उभे—
अवहिद^j म्ह।
[अवहिते स्वः।]

शकुन्तला—(वाचयति)
तुज्झ ण आणे हिअअं, मम उण कामो दिवा वि रत्तिं पि।
[तव न जाने हृदयं, मम पुनः कामः दिवा अपि रात्रिम् अपि]
णिग्घिण^k तवेदि बलिअं, तुइ वुत्तमणोरहाइ^l अङ्गाइं ॥६९॥
[निर्घृण तपति बलीयः त्वयि वृत्तमनोरथायाः अङ्गानि॥]

राजा—(सहसोपसृत्य)
तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति^{m} यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥७०॥

---

a I am compelled by you to do this
b 3-1 forgetful to wink
c 1-1 having an eye-brow raised
d 2-3 verse
e 3-1 thrilling
f 1-3 writing materials
g 7-1 as soft as the breast of a parrot
h 2-1 having letters engraved
i 1-1 connected in sense
j 1-2 attentive
k 8-1 cruel
l having (her) desires centered on thee
m causes to fade

सख्यौ—(विलोक्य ससंभ्रममुत्थाय)

साअदं अविलम्बिणो मणोरधस्स।
[स्वागतम् अविलम्बिनः मनोरथस्य।]

(शकुन्तलाभ्युत्थातुमिच्छति)

राजा—

अलमलमायासेन।

संदष्टकुसुमशयनान्याशुक्लान्तविसभङ्गसुरभीणि *a*।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति *b* ॥ ७१ ॥

अनसूया—

इदो सिलादलेक्कदेसं अणुगेह्णदु वअस्सो।
[इतः शिलातलैकदेशम् अनुगृह्णातु वयस्यः।]

(राजोपविशति। शकुन्तला सलज्जा तिष्ठति)

प्रियंवदा—

दोण्णं पि वो अण्णोण्णाणुराओ पच्चक्खो। सहीसिणेहो
[द्वयोः अपि युवयोः अन्योन्यानुरागः प्रत्यक्षः। सखीस्नेहः]
उण मं पुणरुत्तवादिणिं *c* करेदि।
[पुनर् मां पुनरुक्तवादिनीं करोति।]

राजा—

भद्रे, नैतत्परिहार्यम्। विवक्षितं *d* ह्यनुक्तमनुतापं *e* जनयति।

प्रियंवदा—

आवण्णस्स *f* विसअवासिणो जणस्स अत्तिहरेण रण्णा
[आपन्नस्य विषयवासिनः जनस्य आर्तिहरेण राज्ञा]
होदव्वं त्ति एसो वो धम्मो।
[भवितव्यम् इति एषः वः धर्मः।]

राजा—

नास्मात्परम् *g*।

प्रियंवदा—

तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं
[तेन हि इयम् आवयोः प्रियसखी त्वाम् उद्दिश्य इदम्]
अवत्थन्तरं *h* भअवदा मअणेण आरोविदा। ता अरुहसि
[अवस्थान्तरं भगवता मदनेन आरोपिता। तद् अर्हसि]
अब्भुववत्तीए *i* जीविदं से अवलम्बिदुं *j*।
[अभ्युपपत्त्या जीवितम् अस्याः अवलम्बितुम्।]

राजा—

भद्रे, साधारणोऽयं प्रणयः। सर्वथानुगृहीतोऽस्मि।

a pressed (closed)

b 2-1 usual show of respect

c lit. said again; superfluous

d 1-1 intended speech

e 2-1 lit. after-pain; repentance

f 6-1 fallen into trouble; distressed

g lit. no other than this; this is exactly my duty

h 2-1 another state; unhealthy condition

i 3-1 acceptance

j to sustain

शकुन्तला—(प्रियंवदामवलोक्य)

हला, किं अन्तेउराविरहपज्जुस्सुअस्स*a* राएसिणो उवरोहेण।
[हला, किम् अन्तःपुरविरहपर्युत्सुकस्य राजर्षेः उपरोधेन।]

राजा—

सुन्दरि,

इदमनन्यपरायणमन्यथा*b*
हृदयसन्निहिते हृदयं मम।
यदि समर्थयसे मदिरेक्षणे*c*
मदनबाणहतोऽस्मि हतः पुनः ॥७२॥

अनसूया—

वअस्स, बहुवल्लहा*d* राआणो सुणीअन्ति। जधा णो पिअसही
[वयस्य, बहुवल्लभाः राजानः श्रूयन्ते । यथा नौ प्रियसखी]
बन्धुअणसोअणिज्जा*e* ण होदि तधा णिव्वाहेहि।
[बन्धुजनशोचनीया न भवति तथा निर्वाहय।]

राजा—

भद्रे, किं बहुना।

परिग्रहबहुत्वेऽपि*f* द्वे प्रतिष्ठे कुलस्य मे।
समुद्ररशना*g* चोर्वी सखी च युवयोरियम् ॥७३॥

उभे—

णिव्वुद म्ह*h*।
[निर्वृते स्वः।]

प्रियंवदा—(सदृष्टिक्षेपम्)

अणसूए जधा एसो इदो दिण्णदिट्ठी उस्सुओ मिअपोदओ*i*
[अनसूये, यथा एषः इतः दत्तदृष्टिः उत्सुकः मृगपोतकः]
मादरं अण्णेसदि, एहि, संजोएम णं।
[मातरम् अन्विष्यति एहि, संयोजयावः एनम्।]

(इत्युभे प्रस्थिते)

शकुन्तला—

हला, असरण म्हि। अण्णदरा*j* वो आअच्छदु।
[हला, अशरणा अस्मि। अन्यतरा युवयोः आगच्छतु।]

उभे—

पुढवीए जो सरणं, सो तुह समीवे वट्टदि।
[पृथिव्याः यः शरणम्, सः तव समीपे वर्तते।]

(इति निष्क्रान्ते)

a 6-1 afflicted by reason of separation from the secret apartments of his palace

b 2-1 devoted to no other

c 8-1 lit. wine-eyed; having eyes intoxicating like wine; lovely-eyed one

d 1-3 having many favourite consorts

e 1-1 grieved for by her relations

f wife

g 1-1 having the sea for her girdle

h our anxiety is dissipated

i 1-1 little fawn

j 1-1 either of the two

शकुन्तला —

कहं गदाओ एव्व ।

[कथं गते एव ।]

राजा—

अलमावेगेन । नन्वयमाराधयिता^{a} जनस्तव समीपे वर्तते ।

किं शीतलैः क्लमविनोदिभिरार्द्रवातान्^{b}

संचारयामि नलिनीदलतालवृन्तैः ।

अङ्के निधाय करभोरु^{c} यथासुखं ते

संवाहयामि चरणावुत पद्मताम्रौ ॥ ७४ ॥

शकुन्तला—

ण माणणीएसु अत्ताणं अवराहइस्सं ।

[न माननीयेषु आत्मानम् अपराधयिष्यामि ।]

(इत्युत्थाय गन्तुमिच्छति)

राजा—

सुन्दरि, अपरिनिर्वाणो^{d} दिवसः । इयं च ते शरीरावस्था ।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम् ।

कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः^{e} ॥७५॥

(इति बलादेनां निवर्तयति)

शकुन्तला—

पौरव, रक्ख विणअं । मअणसन्तत्ता वि ण क्खु अत्तणो

[पौरव, रक्ष विनयम् । मदनसन्तप्ता अपि न खलु आत्मनः]

पहवामि ।

[प्रभवामि ।]

राजा—

भीरु, अलं गुरुजनभयेन । दृष्ट्वा, ते विदितधर्मा तत्रभवान्नात्र

दोषं ग्रहीष्यति कुलपतिः । अपि च,

गान्धर्वेण विवाहेन* बह्व्यो राजर्षिकन्यकाः ।

श्रूयन्ते परिणीतास्ताः^{f} पितृभिश्चाभिनन्दिताः ॥७६॥

शकुन्तला—

मुञ्च दाव मं । भूओ वि सहीजणं अणुमाणइस्सं^{g} ।

[मुञ्च तावद् माम् । भूयः अपि सखीजनम् अनुमानयिष्यामि ।]

राजा—

भवतु । मोदयामि ।

शकुन्तला—

कदा ?

[कदा ?]

a 1·1 adorer

b 3·3 remover of langour

c 8·1 the word करभ means 'the part of the hand between the wrist and the fingers' and 'the upper part of an elephant's trunk'; and ऊरु means 'thigh or hip.' When ऊरु is a second member in a compound and implies resemblance, it takes the affix ऊ in the fem. The epithet may therefore mean 'round thighed one, or 'having thigh gracefully tapering like the trunk of an elephant.'

d 1·1 having its great heat not entirely subsided

e 3·3 too feeble to bear hardships

* see notes

f 1·3 married

g I will take counsel with

X They are doomed to pass through the night apart (whence the name रात्रिविश्लेषगामिन्) in consequence of a curse pronounced upon them by a sage whom they had offended.

राजा—

अपरिक्षतकोमलस्य यावत्
कुसुमस्येव नवस्य षट्पदेन[a] ।
अधरस्य पिपासता मया ते
सदयं सुन्दरि गृह्यते रसोऽस्य ॥७७॥

(इति मुखमस्याः समुन्नयितुमिच्छति । शकुन्तला परिहरति नाट्येन)

नेपथ्ये—

X चक्कवाकवहुए*, आमन्तेहि[b] सहअरं । उवट्ठिदा रअणी ।
[चक्रवाकवधुके, आमन्त्रयस्व सहचरम् । उपस्थिता रजनी ।]

शकुन्तला—(ससम्भ्रमम्)

पोरव, असंसअं मम सरीरवुत्तन्तोवलम्भस्स[c] अज्जा गोदमी
[पौरव, असंशयं मम शरीरवृत्तान्तोपलम्भाय आर्या गौतमी]
इदो एव्व आअच्छदि । दाव विडवन्तरिदो होहि ।
[इतः एव आगच्छति । तावद् विटपान्तरितो भव ।]

राजा—

तथा ।

(इत्यात्मानमावृत्य तिष्ठति)

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च)

सख्यौ—

इदो इदो अज्जा गोदमी ।
[इतः इतः आर्या गौतमी ।]

गौतमी—(शकुन्तलामुपेत्य)

जादे, अवि लहुसन्दावाइं दे अङ्गाइं ?
[जाते, अपि लघुसन्तापानि ते अङ्गानि ?]

शकुन्तला—

अज्जे, अत्थि मे विसेसो[d] ।
[आर्ये, अस्ति मे विशेषः ।] नैरुज्यं किञ्चिदिदानीं वृत्तम्.

गौतमी— विशेषः a change for the better in contra-distinction to vikāra, a change for the worse.

इमिणा दब्भोदएण णिराबाहं एव्व दे सरीरं भविस्सदि ।
[अनेन दर्भोदकेन निराबाधम् एव ते शरीरं भविष्यति ।]
(शिरसि शकुन्तलामभ्युदय)
वच्छे, परिणदो दिअहो[e] । एहि, उडजं एव्व गच्छम्ह ।
[वत्से, परिणतः दिवसः । एहि, उटजम् एव गच्छामः ।]

(इति प्रस्थिताः)

a 3·1 bee

* see notes
b bid farewell

c 6·1 to inquire after (my) health. In *Prakrit* genitive is used for dative.

d 1·1 change for the better

e the day is closing

शकुन्तला—(आत्मगतम्)

हिअअ, पढमं एव्व सुहोवणदे मणोरधे कादरभावं ण
[हृदय, प्रथमम् एव सुखोपनते मनोरथे कातरभावं न]
मुञ्चसि । साणुसअविहडिअस्स*a* कहं दे सम्पदं सन्दावो ।
[मुञ्चसि । सानुशयविघटितस्य कथं ते साम्प्रतं सन्तापः ।]
(पदान्तरे स्थित्वा । प्रकाशम्)

लदावलअ सन्दावहारअ, आमन्तेमि तुमं भूओ वि
[लतावलय सन्तापहारक, आमन्त्रये त्वां भूयः अपि]
परिभोअस्स ।
[परिभोगाय ।]

(दुःखेन निष्क्रान्ता शकुन्तला सहेताभिः)

राजा—(पूर्वस्थानमुपेत्य । सनिःश्वासम्)

अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः । मया हि

मुहुरङ्गुलिसंवृताधरोष्ठं*b*
प्रतिषेधाक्षरविक्लवाभिरामम्*c* ।
मुखमंसविवर्ति*d* पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं तु ॥७८॥

क नु खलु सम्प्रति गच्छामि । अथवा, इहैव प्रियापरिभुक्तमुक्ते*e*
लतावलये मुहूर्तं स्थास्यामि । (सर्वतोऽवलोक्य)

तस्याः पुष्पमयी शरीरलुलिता*f* शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्ताद्भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो*g*
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोऽस्मि शून्यादपि ॥७९॥

आकाशे—

राजन्,

सायन्तने*h* सवनकर्मणि संप्रवृत्ते
वेदीं हुताशनवतीं परितः प्रकीर्णाः ।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः*i* पिशिताशनानाम्*j* ॥८०॥

राजा—

अयमयमागच्छामि ।

(इति निष्क्रान्तः)

॥ इति तृतीयोऽङ्कः ॥

a 6-1 regretful and broken-hearted

b guarded

c denial

d 1-1 bending towards her shoulder

e once occupied, now abandoned

f rubbed

g 1-1 ornament of lotus-fibre

h 7-1 pertaining to evening

i 1-3 brown as evening clouds

j 6-3 lit. eater of raw flesh; *Rakshasa*

॥ अथ चतुर्थाङ्कादौ विष्कम्भः ॥

(ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ)

अनसूया—

हला, पिअंवदे, जइ वि गन्धव्वेण विवाहविहिणा णिव्वुत्त-
[हला, प्रियंवदे, यदि अपि गान्धर्वेण विवाहविधिना निर्वृत्त-]
कल्लाणा*a* सउन्दला अनुरूवभत्तुगामिणी संवुत्त त्ति णिव्वुदं*b*
[कल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्ता इति निर्वृतं]
मे हिअअं, तह वि एत्तिअं चिन्तणिज्जं ?
[मे हृदयम्, तथा अपि इयत् चिन्तनीयम् ?]

प्रियंवदा—

कहं विअ ।
[कथम् इव ।]

अनसूया—

अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिओ
[अद्य सः राजर्षिः इष्टिं परिसमाप्य ऋषिभिः विसर्जितः]
अत्तणो णअरं पविसिअ अन्तेउरसमाअदो इदोगदं वुत्तन्तं
[आत्मनः नगरं प्रविश्य अन्तःपुरसमागतः इतोगतं वृत्तान्तं]
सुमरदि वा ण व त्ति ।
[स्मरति वा न वा इति ।]

प्रियंवदा—

वीसद्धा होहि । ण तादिसा आकिदिविसेसा*c* गुणविरोहिणो
[विश्रब्धा भव । न तादृशाः आकृतिविशेषाः गुणविरोधिनः]
होन्ति । किन्तु तादो दाणिं इमं वुत्तन्तं सुणिअ ण आणे
[भवन्ति । किन्तु तातः इदानीम् इमं वृत्तान्तं श्रुत्वा न जाने]
किं पडिवज्जिस्सदि त्ति ।
[किं प्रतिपत्स्यते इति ।]

अनसूया—

जह अहं पेक्खामि, तह तस्स अणुमदं*d* भवे ।
[यथा अहं प्रेक्षे, तथा तस्य अनुमतं भवेत् ।]

प्रियंवदा—

कहं विअ ?
[कथम् इव ?]

अनसूया—

गुणवदे कण्णआ पडिवादणिज्ज*e* त्ति अअं दाव पढमो
[गुणवते कन्या प्रतिपादनीया इति अयं तावत् प्रथमः]

a 1-1 completely happy
b 1-1 rejoiced
c 1-3 distinguished personalities
d 1-1 approved
e daughter should be given to a virtuous husband

सङ्कप्पोa। तं जइ देव्वं एव्व सम्पादेदि, णं अप्पाआसेणb
[सङ्कल्पः । तं यदि दैवम् एव सम्पादयति, ननु अल्पायासेन]
किदत्थो गुरुअणो।
[कृतार्थः गुरुजनः।]

प्रियंवदा—(पुष्पभाजनं विलोक्य)

सहि, अवइदाइं बलिकम्मपज्जत्ताइंc कुसुमाइं।
[सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि।]

अनसूया—

णं पिअसहीए सउन्दलाए सोहग्गदेवआd अच्चणीआ।
[ननु प्रियसख्याः शकुन्तलायाः सौभाग्यदेवता अर्चनीया।]

प्रियंवदा—

जुज्जदि।
[युज्यते।]

(इति तदेव कर्मारभेते)

नेपथ्ये—

अयमहं भोः।

अनसूया—(कर्णं दत्त्वा)

सहि, अदिहिणा विअ णिवेदिदंe।
[सखि, अतिथिना इव निवेदितम्।]

प्रियंवदा—

णं उडजसण्णिहिदा सउन्दला।
[ननु उटजसन्निहिता शकुन्तला।]
(आत्मगतम्)
अज्ज उण हिअएण असण्णिहिदा।
[अद्य पुनर् हृदयेन असन्निहिता।]

अनसूया—

होदु। अलं एत्तिएहिं कुसुमेहिं।
[भवतु। अलम् इयद्भिः कुसुमैः।]

(इति प्रस्थिते)

नेपथ्ये—

आ अतिथिपरिभाविनिf,
विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपिg सन्
कथां प्रमत्तःh प्रथमं कृतामिव ॥८१॥

a 1-1 resolve
b 3-1 little trouble
c 1-3 enough for the sacred offering
d 1-1 fortune-deity. [illegible] notes also
e it seems as if some guest has announced his arrival
f 8-1 disrespectful to a guest
g even when reminded
h 1-1 drunkard

प्रियंवदा—

हद्धी हद्धी । अप्पिअं एव्व संवुत्तं । कस्सिं पि
[हाधिक् हाधिक् । अप्रियम् एव संवृत्तम् । कस्मिन् अपि]
पूआरुहे अवरद्धा सुण्णहिअआ[a] सउन्दला ।
[पूजार्हे अपराद्धा शून्यहृदया शकुन्तला ।]

(पुरोऽवलोक्य)

ण क्खु जस्सिं कस्सिं पि । एसो दुव्वासो सुलहकोवो[b]
[न खलु यस्मिन् कस्मिन् अपि । एषः दुर्वासाः सुलभकोपः]
महेसी । तथा सविअ वेअचडुलुप्फुल्लदुव्वाराए गईए[c]
[महर्षिः । तथा शप्त्वा वेगचटुलोत्फुल्लदुर्वारया गत्या]
पडिणिवुत्तो । को अण्णो हुदवहादो[d] दहिदुं पहविस्सदि ।
[प्रतिनिवृत्तः । कः अन्यः हुतवहात् दग्धुं प्रभविष्यति ।]

अनसूया—

गच्छ । पादेसु पणमिअ णिवत्तेहि णं । जाव अहं
[गच्छ । पादयोः प्रणम्य निवर्तय एनम् । यावद् अहम्]
अग्घोदअं उवकप्पेमि[e] ।
[अर्घोदकम् उपकल्पयामि ।]

प्रियंवदा—

तथा ।
[तथा ।]

(इति निष्क्रान्ता)

अनसूया—(पदान्तरे स्खलितं निरूप्य)

अम्मो, आवेअक्खलिदाए[f] गईए पब्भट्ठं मे हत्थादो पुप्फ-
[अहो, आवेगस्खलितया गत्या प्रभ्रष्टं मे हस्तात् पुष्प-]
भाअणं ।
[भाजनम् ।]

(इति पुष्पोच्चयं रूपयति)

प्रियंवदा—(प्रविश्य)

सहि, पकिदिवक्को[g] सो कस्स अणुणअं[h] पडिगेण्हदि । किं
[सखि, प्रकृतिवक्रः सः कस्य अनुनयं प्रतिगृह्णाति । किम्]
वि उण साणुक्कोसो किदो ।
[अपि पुनः सानुक्रोशः कृतः ।]

अनसूया—(सस्मितम्)

तस्सिं बहु एदं पि । कहेहि ।
[तस्मिन् बहु एतद् अपि । कथय ।]

---

a 1-1 absent-minded

b 1-1 easily provoked

c with a gait trembling with passion, bounding and difficult to check

d 5-1 fire

e prepare

f 3-1 faltering through haste

g 1-1 crooked by nature

h 2-1 propitiation

प्रियंवदा—

जदा णिवत्तिदुं ण इच्छदि, तदा विण्णविदो मए । भअवं
[यदा निवर्तितुं न इच्छति, तदा विज्ञापितः मया । भगवन्]
पढमं त्ति पेक्खिअ अविण्णादतवप्पहावस्स[a] दुहिदु-
[प्रथमम् इति प्रेक्ष्य अविज्ञाततपःप्रभावस्य दुहितृ-]
जणस्स भअवदा एक्को अवराहो मरिसिदव्वो[b] त्ति ।
[जनस्य भगवता एकः अपराधः मर्षयितव्यः इति ।]

अनसूया—

तदो तदो ?
[ततः ततः ?]

प्रियंवदा—

तदो 'मे वअणं अण्णधा भविदुं णारिहदि । किन्दु अहिण्णाणा-
[ततः 'मे वचनम् अन्यथा भवितुं नार्हति । किन्तु अभिज्ञाना-]
भरणदंसणेण सावो णिवत्तिस्सदि[c]' त्ति मन्तअन्तो[d] सअं
[भरणदर्शनेन शापः निवर्तिष्यते' इति मन्त्रयमाणः स्वयम्]
अन्तरिहिदो[e] । न मे पुनर्वचनात्कश्चित् ऽभूदिमर्थः।
[अन्तर्हितः ।]

अनसूया—

सक्कं दाणिं अस्ससिदुं अत्थि[f] । तेण राएसिणा
[शक्यम् इदानीम् आश्वसितुम् अस्ति । तेन राजर्षिणा]
सम्पत्थिदेण सणामहेअङ्किअं अङ्गुलीअअं सुमरणीअं त्ति
[सम्प्रस्थितेन स्वनामधेयाङ्कितम् अङ्गुलीयकं स्मरणीयम् इति]
सअं पिणद्धं । तस्सिं साहीणोवाआ[g] सउन्दला
[स्वयम् पिनद्धम् । तस्मिन् स्वाधीनोपाया शकुन्तला]
भविस्सदि ।
[भविष्यति ।]

प्रियंवदा—

सहि, एहि । देवकज्जं दाव णिव्वत्तेम्ह ।
[सखि, एहि । देवकार्यं तावद् निर्वर्तयावः ।]

(इति परिक्रामतः)

प्रियंवदा—(अवलोक्य)

अणसूए, पेक्ख दाव । वामहत्थोवहिदवअणा[h] आलिहिदा
[अनसूये, प्रेक्षस्व तावत् । वामहस्तोपहितवदना आलिखिता]

a 6-1 unaware of the potency of penance

b 1-1 pardonable

c curse will come to an end

d 1-1 muttering

e 1-1 disappeared

f lit. now it is possible (for us) to breathe; we have no anxiety about *Sakuntala* now. as a Souvenir

g 1-1 having a remedy in her own power

h 1-1 with her face resting on her left hand

विअ पिअसही। भट्टुगदाए चिन्ताए अत्ताणं पि ण
[इव प्रियसखी। भर्तृगतया चिन्तया आत्मानम् अपि न]
एसा विभावेदि*a*। किं उण आअन्तुअं*b*।
[एषा विभावयति। किं पुनर् आगन्तुकम्।]

अनसूया—

पिअंवदे, दोण्हं एव्व णो मुहे एसो वुत्तन्तो चिट्ठदु*c*।
[प्रियंवदे द्वयोः एव नौ मुखे एषः वृत्तान्तः तिष्ठतु।]
रक्खणीआ खु पकिदिपेलवा*d* पिअसही।
[रक्षणीया खलु प्रकृतिपेलवा प्रियसखी।]

प्रियंवदा—

को दाणिं उण्होदएण णोमालिअं सिञ्चदि।
[कः इदानीम् उष्णोदकेन नवमालिकां सिञ्चति।]

(इत्युभे निष्क्रान्ते)

॥ इति विष्कम्भः ॥

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति सुप्तोत्थितः*e* शिष्यः)

शिष्यः—

वेलोपलक्षणार्थम्*f* आदिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन*g* काश्यपेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या*h* इति। (परिक्रम्यावलोक्य च) हन्त प्रभातम्। तथा हि

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्*i*
आविष्कृतारुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां*j*
लोको नियम्यत इवात्मदशान्तरेषु ॥ ८२ ॥

अपि च

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा*k*।
इष्टप्रवासजनितान्यबलाजनस्य*l*
दुःखानि नूनमतिमात्रसुदुःसहानि ॥ ८३ ॥

अपिच

कर्कन्धूनामुपरि*m* तुहिनं रञ्जयत्यग्रसन्ध्या*
दार्भं*n* मुञ्चत्युटजपटलं वीतनिद्रो मयूरः।

a she is indifferent even to her own self
b 2-1 guest
c let this secret be confined to us both
d 1-1 tender by nature
e 1-1 awakened from sleep
f to ascertain the time of day
g 3-1 just returned from journey
h how much of the night remains
i lit. lord of herbs; the moon
j 3-2 simultaneous rise and fall
k 1-1 of impressive beauty
l 1 3 arising from a lover's separation
m 6-3 jujube; Panj. *Kokan ber*
* see notes
n 2-1 made of grass

वेदिप्रान्तात् खुरविलिखितादुत्थितश्चैष सद्यः
पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः a ॥ ८४ ॥

अपि च

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा b मध्यमं धाम विष्णोः ।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिर्भवति c महतामप्यपभ्रंशनिष्ठा ॥८५॥

अनसूया—(प्रविश्य पटाक्षेपेण)

एव्वं णाम विसअपरम्मुहस्स d वि इमस्स जणस्स ण
[एवं नाम विषयपराङ्मुखस्य अपि अस्य जनस्य न]
एदं ण विदिअं, 'तेण रण्णा सउन्दलाए अणज्जं
[एतद् न विदितम्, 'तेन राज्ञा शकुन्तलायाम् अनार्यम्]
आअरिदं' त्ति ।
[आचरितम्' इति ।]

शिष्यः—

यावदुपस्थितां होमवेलां गुरवे निवेदयामि ।

(इति निष्क्रान्तः)

अनसूया—

पडिबुद्धा e वि किं करिस्सं । ण मे उइदेसु f वि णिअ-
[प्रतिबुद्धा अपि किं करिष्यामि । न मे उचितेषु अपि निज-]
करणिज्जेसु हत्थपाआ पसरन्ति । कामो दाणिं सकामो g
[करणीयेषु हस्तपादाः प्रसरन्ति । कामः इदानीं सकामः]
होदु । जेण असच्चसन्धे h जणे सुद्धहिअआ सही पदं
[भवतु । येन असत्यसन्धे जने शुद्धहृदया सखी पदं]
कारिदा । अहवा दुव्वाससावो एसो विआरेदि । अण्णआ
[कारिता । अथवा दुर्वासःशापः एषः विकारयति । अन्यथा]
कहं सो राएसी तादिसाणि मन्तिअ एत्तिअस्स कालस्स
[कथं सः राजर्षिः तादृशानि मन्त्रयित्वा एतावतः कालस्य]
लेहमत्तं पि ण विसज्जेदि । ता इदो अहिण्णाणं
[लेखमात्रम् अपि न विसर्जयति । तस्माद् इतः अभिज्ञानम्]
अङ्गुलीअअं से विसज्जेम । दुक्खसीले तवस्सिजणे
[अङ्गुलीयकम् अस्य विसर्जयावः । दुःखशीले तपस्विजने]
को अब्भत्थीअदु i । णं सहीगामी दोसो त्ति ववसिदा j
[कः अभ्यर्थ्यताम् । ननु सखीगामी दोषः इति व्यवसिता]

a 1-1 stretching his body

b 3-1 who has dispersed darkness

c 1-1 highest ascent

d 6-1 withdrawn from worldly concerns

e 1-1 awakened
f 7-3 usual

g 1-1 possessed of one's wish, i.e., successful

h 7-1 making false promise

i who among the ascetics, already bearing the hardships of penance, may be requested (to carry the ring to the king)
j 1-1 convinced

वि ण पारेमि[a] पवासपडिणिवुत्तस्स तादकस्सवस्स
[अपि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य]
दुस्सन्दपरिणीदं आवण्णसत्तं[b] सउन्दलं णिवेदिदुं ।
[दुष्यन्तपरिणीताम् आपन्नसत्त्वां शकुन्तलां निवेदयितुम् ।]
इत्थंगए[c] अम्हेहिं किं करणिज्जं ।
[इत्थंगते अस्माभिः किं करणीयम् ।]

प्रियंवदा—(प्रविश्य, सहर्षम्)

सहि, तुवर तुवर सउन्दलाए पत्थाणकोदुअं[d] णिव्वत्तिदुं ।
[सखि, त्वरय त्वरय शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम् ।]

अनसूया—

सहि, कहं एदं ?
[सखि, कथम् एतत् ?]

प्रियंवदा—

सुणाहि दाणिं । सुहसइदं पुच्छिदुं[e] सउन्दलासआसं
[शृणु । इदानीम् * सुखशयितं प्रष्टुं शकुन्तलासकाशं]
गदा म्हि ।
[गता अस्मि ।]

अनसूया—

तदो तदो ?
[ततः ततः ?]

प्रियंवदा—

दाव एणं लज्जावणदमुहिं परिस्सजिअ सअं तादकस्सवेण
[तावद् एनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकाश्यपेन]
एव्वं अहिणन्दिदं, 'दिट्ठिआ, धूमाउलिददिट्ठिणो[f] वि
[एवम् अभिनन्दितम्, 'दिष्ट्या, धूमाकुलितदृष्टेः अपि]
जजमाणस्स पावए जेव्व आहुदी पडिदा । वच्छे, सुसि-
[यजमानस्य पावके एव आहुतिः पतिता । वत्से, सुशि-]
स्सपरिदिण्णा विअ विज्जा असोअणिज्जा संवुत्ता* । अज्ज
[ष्यपरिदत्ता इव विद्या अशोचनीया संवृत्ता । अद्य]
एव्व इसिपडिरक्खिदं[g] तुमं भत्तुणो सआसं विसज्जेमि' त्ति ।
[एव ऋषिप्रतिरक्षितां त्वां भर्तुः सकाशं विसर्जयामि' इति ।]

अनसूया—

अथ केण सूइदो तादकस्सवस्स वुत्तन्तो ?
[अथ केन सूचितः तातकाश्यपस्य वृत्तान्तः ?]

a I dare not

b 2-1 big with child

c such being the state of affairs

d 2-1 rites performed at departure

e to enquire if she had had a comfortable sleep

f 6-1 having sight dimmed by smoke

* see notes

g 2-1 escorted by sages

प्रियंवदा—

अग्गिसरणं*a* पविट्ठस्स सरीरं विणा छन्दोमईए*b* वाआए।
[अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाचया।]

अनसूया—(सविस्मयम्)

केहि।
[कथय।]

प्रियंवदा—(संस्कृतमाश्रित्य*)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव* ॥ ८६ ॥

अनसूया—(प्रियंवदामाश्लिष्य)

सहि, पिअं मे, पिअं मे। किन्दु अज्ज एव्व सउन्दला
[सखि, प्रियं मे, प्रियं मे। किन्तु अद्य एव शकुन्तला]
णीअदि त्ति उक्कण्ठासाहारणं*c* परितोसं अणुहोमि।
[नीयते इति उत्कण्ठासाधारणं परितोषम् अनुभवामि।]

प्रियंवदा—

सहि, वअं दाव उक्कण्ठं विणोदइस्सामो। सा तवस्सिणी
[सखि, आवां तावद् उत्कण्ठां विनोदयिष्यावः। सा तपस्विनी]
णिव्वुदा होदु।
[निर्वृता भवतु।]

अनसूया—

तेण हि एदस्सिं चूदसाहावलम्बिदे णारिएरसमुग्गए
[तेन हि एतस्मिन् चूतशाखावलम्बिते नारिकेलसमुद्गके]
एतण्णिमित्तं जेव्व कालन्तरक्खमा*d* णिक्खित्ता मए केसर-
[एतन्निमित्तम् एव कालान्तरक्षमा निक्षिप्ता मया केशर-]
मालिआ। ता इमं हत्थसण्णिहिदं करेहि। जाव अहं
[मालिका। तद् इमां हस्तसन्निहितां कुरु। यावद् अहम्]
पि से मिअलोअणं तित्थमट्टिअं दुव्वाकिसलआणि
[अपि अस्याः मृगरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानि]
त्ति मङ्गलसमालम्भणाणि* विरएमि।
[इति मङ्गलसमालम्भनानि विरचयामि।]

प्रियंवदा—

तधा करीअदु।
[तथा क्रियताम्।]

(अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन सुमनसो गृह्णाति)

a 2-1 fire-sanctuary
b 3-1 metrical; composed in verse

* see notes

* see notes

c 2-1 mixed with uneasiness arising from separation

d 1-1 capable of keeping fresh for some time

* see notes

नेपथ्ये—

गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

प्रियंवदा—(कर्णं दत्त्वा)

अणसूए, तुवर तुवर। एदे क्खु हत्थिणाउरगामिणो इसीओ
[अनसूये, त्वरय त्वरय। एते खलु हस्तिनापुरगामिनः ऋषयः]
सद्दावीअन्ति।
[शब्दाय्यन्ते।]

अनसूया—(प्रविश्य समालम्भनहस्ता)

सहि, एहि गच्छम्ह।
[सखि, एहि गच्छावः।]

(इति परिक्रामतः)

प्रियंवदा—(विलोक्य)

एसा सुज्जोदए जेव्व सिहामज्जिदा[a] पडिच्छिदणीवारहत्थाहिं[b]
[एषा सूर्योदये एव शिखामार्जिता प्रतिच्छितनीवारहस्ताभिः]
सोत्थिवाअणिआहिं[c] तावसीहिं अहिणन्दीअमाणा सउन्दला
[स्वस्तिवाचनिकाभिः तापसीभिः अभिनन्द्यमाना शकुन्तला]
चिट्ठदि। उवसप्पम्ह णं।
[तिष्ठति। उपसर्पावः एनाम्।]

(इत्युपसर्पतः)

(ततः प्रविशति यथोद्दिष्टव्यापारावस्था शकुन्तला)

तापसीनामन्यतमा—(शकुन्तलां प्रति)

जादे, भत्तुणो बहुमाणसूअअं[d] महादेवीसद्दं[e] लहेहि।
[जाते, भर्तुः बहुमानसूचकं महादेवीशब्दं लभस्व।]

द्वितीया—

वच्छे, वीरप्पसविणी[f] होहि।
[वत्से, वीरप्रसविनी भव।]

तृतीया—

वच्छे, भत्तुणो बहुमदा होहि।
[वत्से, भर्तुः बहुमता भव।]

(इत्याशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः)

सख्यौ—(उपसृत्य)

सहि, सुहमज्जणं दे होदु[g]।
[सखि, सुखमार्जनं ते भवतु।]

---

a 1-1 with her locks washed and combed
b 3-3 having consecrated wild rice in their hands
c 3-3 reciting auspicious songs
d 2-1 indicating great honour
e 2-1 the title 'Chief Queen'
f 1-1 mother of heroes
g lit. may it be an auspicious ablution to thee i.e., may it bring thee good fortune

शकुन्तला—

साअदं मे सहीणं। इदो णिसीदध।
[स्वागतं मे सखीभ्याम्। इतः निषीदतम्।]

उभे—(मङ्गलपात्राण्यादाय। उपविश्य)

हला, सज्जा[a] होहि, जाव मङ्गलसमालम्भणं विरएम।
[हला, सज्जा भव, यावद् मङ्गलसमालम्भनं विरचयावः।]

a 1-1 ready

शकुन्तला—

एदं पि बहुमन्तव्वं। दुल्लहं दाणिं मे सहीमण्डणं[b]
[एतद् अपि बहुमन्तव्यम्। दुर्लभम् इदानीं मे सखीमण्डनं]
भविस्सदि।
[भविष्यति।]

b 1-1 decoration by (my) friends

(इति बाष्पं विसृजति)

उभे—

सहि, उइदं ण दे मङ्गलआले रोदिदुं।
[सखि, उचितं न ते मङ्गलकाले रोदितुम्।] अनेन भविष्यद्वियोगः सूचित

(इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)

प्रियंवदा—

आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं[c] विप्प-
[आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैः विप्र-]
आरीअदि[d]। असाधु क्रियते
[कार्यते।]

c 3-3 decoration विकार्यते इति क

d is slighted

विप्रलभ्यते विपत इति पाठद्वयं बङ्गदे पुस्तकेषु-

(प्रविश्योपायनहस्तावृषिकुमारकौ)

उभौ—

इदमलङ्करणम्। अलङ्क्रियतामत्रभवती।

(सर्वा विलोक्य विस्मिताः)

गौतमी—

वच्छ णारअ, कुदो एदं?
[वत्स नारद, कुतः एतत्?]

प्रथमः—

तातकाश्यपप्रभावात्।

गौतमी—

किं माणसी सिद्धी[e]?
[किं मानसी सिद्धिः?] सृष्टिरिति काट० पठति।

e is it through the power of his mind?

द्वितीयः—

न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः 'शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्यहरतेति ।' तत इदानीम्,

क्षौमं*a* केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं*b*
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः* केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै*c*-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः*d* ॥ ८७ ॥

प्रियंवदा—(शकुन्तलां विलोक्य)

हला, इमाए अब्भुववत्तीए सूइदा दे भत्तुणो गेहे अणुहोदव्वा राअलच्छि त्ति ।
[हला, अनया अभ्युपपत्त्या सूचिता ते भर्तुः गृहे अनुभवितव्या राजलक्ष्मीः इति ।]

(शकुन्तला व्रीडां रूपयति)

प्रथमः—

गौतम, एह्येहि । अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां*e* निवेदयावः ।

द्वितीयः—

तथा ।

(इति निष्क्रान्तौ)

सख्यौ—

अए, अणुवहुत्तभूसणो*f* अअं जणो । चित्तकम्मपरिअएण*g* अङ्गेसु दे आहरणविणिओअं करेम्ह ।
[अये, अनुपभुक्तभूषणः अयं जनः । चित्रकर्मपरिचयेन अङ्गेषु ते आभरणविनियोगं कुर्वः ।]

शकुन्तला—

जाणे वो णेउणं*h* ।
[जाने वो नैपुणम् ।]

(उभे नाट्येनालंकुरुतः)

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः)

काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं*i* मम तावदीदृशमपि स्नेहादरण्यौकसः*j*
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः*k* ॥ ८८ ॥

(इति परिक्रामति)

a 1-1 silken
b produced
* see notes
c wrist
d emulating
e 2-1 service done by trees
f 1-1 who has never put on any ornaments
g 3-1 acquaintance (with decoration) through pictures
h 2-1 skill
i 2-1 restlessness
j 6-1 lit. living in a forest, i.e., ascetic
k separation

सख्यौ—

हला सउन्दले, अवसिदमण्डणा[a] सि । परिधेहि सम्पदं [हला शकुन्तले, अवसितमण्डना असि । परिधत्स्व साम्प्रतं] खोमजुअलं । [क्षौमयुगलम् ।]

(शकुन्तलोत्थाय परिधत्ते)

गौतमी—

जादे, एसो दे आणन्दपरिवाहिणा[b] चक्खुणा परिस्सजन्तो[c] [जाते, एषः ते आनन्दपरिवाहिना चक्षुषा परिष्वजमानः] विअ गुरू उवट्ठिदो । आआरं दाव पडिवज्जस्स[d] । [इव गुरुः उपस्थितः । आचारं तावत् प्रतिपद्यस्व ।]

शकुन्तला—(सव्रीडम्)

ताद, वन्दामि । [तात, वन्दे ।]

काश्यपः—

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि* ॥८६॥

गौतमी—

भअवं, वरो क्खु एसो । ण आसिआ । [भगवन्, वरः खलु एषः । न आशीः ।]

काश्यपः—

वत्से, इतः सद्यो हुताग्नीन् प्रदक्षिणी कुरुष्व* ।

(सर्वे परिक्रामन्ति)

काश्यपः—(ऋक्छन्दसाशास्ते[e])

अमी वेदिं परितः क्लृप्तधिष्ण्याः[f]
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं[g] हव्यगन्धै-
र्वैतानास्त्वां वह्नयः पावयन्तु ॥ ८७ ॥

प्रतिष्ठस्वेदानीम्[h] । (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ?

शिष्यः—(प्रविश्य)

भगवन्, इमे स्मः ।

काश्यपः—

भगिन्यास्ते मार्गमादेशय ।

शार्ङ्गरवः—

इत इतो भवती ।

(सर्वे परिक्रामन्ति)

a 1-1 with one's toilet finished

b 3-1 overflowing with joy

c 1-1 embracing

d observe the usual etiquette (by paying him your respects)

* see notes

* see notes

e blesses her by reciting a verse in Vedic metre, see notes also

f 1-3 having fixed places

g 2-1 evil

h (प्र+स्था+स्व) स्था becomes Atman. after प्र start proceed

काश्यपः—

भो भोः सन्निहितास्तपोवनतरवः !

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि*a* भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ६१ ॥

(कोकिलरवं सूचयित्वा)

अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं*b* कलं यथा
प्रतिवचनीकृतमेभिरीदृशम्*c* ॥ ६२ ॥

आकाशे—

रम्यान्तरः*d* कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः*e* ।
भूयात्कुशेशयरजोमृदुरेणुरस्याः*f*
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ ६३ ॥

(सर्वे सविस्मयमाकर्णयन्ति)

गौतमी—

जादे, णादिजणसिणिद्धाहिं*g* अनुण्णादगमणा सि तवोवण-
[जाते, ज्ञातिजनस्निग्धाभिः अनुज्ञातगमना असि तपोवन-]
देवदाहिं । पणम भअवदीणं ।
[देवताभिः । प्रणम भगवतीभ्यः ।]

शकुन्तला—(सप्रणामं परिक्रम्य । जनान्तिकम्)

हला पिअंवदे, णं अज्जउत्तदंसणुस्सुआए वि अस्समं
[हला प्रियंवदे, ननु आर्यपुत्रदर्शनोत्सुकाया अपि आश्रमं]
परिच्चअन्तीए दुक्खेण मे चलणा पुरदो पवट्टन्ति ।
[परित्यजन्त्याः दुःखेन मे चरणौ पुरतः प्रवर्तेते ।]

प्रियंवदा—

ण केवलं तवोवणविरहकादरा सही एव्व । तुए उवट्ठिद-
[न केवलं तपोवनविरहकातरा सखी एव । त्वया उपस्थित-]
विओअस्स तवोवणस्स वि दाव समवत्था दीसदि ।
[वियोगस्य तपोवनस्य अपि तावत् समवस्था दृश्यते ।]

a though fond of decoration

b cuckoo. This bird is said to have its young ones brought up by crows

c 1-1 responded

d 1-1 pleasant at intervals

e 1-1 having the heat of the sun's rays warded off

f 1-7 having its dust soft as the pollen of lotuses

g 3-3 as affectionate as relatives

उग्गलिअदब्भकवला*a* मिआ परिच्चत्तणच्चणा मोरा ।
[उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्तनाः मयूराः ।]
ओसरिअपण्डुपत्ता*b* मुअन्ति अंसू विअ लदाओ ॥ ६४ ॥
[अपसृतपाण्डुपत्राः मुञ्चन्ति अश्रूणि इव लताः ॥]

शकुन्तला—(स्मृत्वा)

ताद, लदाबहिणिअं वणजोसिणिं दाव आमन्तइस्सं ।
[तात, लताभगिनीं वनज्योत्स्नां तावद् आमन्त्रयिष्ये ।]

काश्यपः—

अवैमि ते तस्यां सोदर्यस्नेहम्*c* । इयं तावद्दक्षिणेन ।

शकुन्तला—(लतामुपेत्य)

वणजोसिणि, चूदसङ्गदा वि मं पच्चालिङ्ग इदोगदाहिं
[वनज्योत्स्ने, चूतसंगता अपि मां प्रत्यालिङ्ग इतोगताभिः]
साहाबाहाहिं । अज्जप्पहुदि दूरपरिवत्तिणी दे खु भविस्सं ।
[शाखाबाहाभिः । अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि ।]

काश्यपः—

सङ्कल्पितं*d* प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च संप्रति वीतचिन्तः*e* ॥ ६५ ॥

इतः पन्थानं प्रतिपद्यस्व ।

शकुन्तला—(सख्यौ प्रति)

हला, एसा दुवेणं वो हत्थे णिक्खेवो*f* ।
[हला, एषा द्वयोः वां हस्ते निक्षेपः ।]

सख्यौ—

अअं जणो कस्स हत्थे समप्पिदो ।
[अयं जनः कस्य हस्ते समर्पितः ।]

(इति बाष्पं विहरतः)

काश्यपः—

अनसूये, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या*g* शकुन्तला ।

(सर्वे परिक्रामन्ति)

शकुन्तला—

ताद, एसा उडजपज्जन्तचारिणी गब्भमन्थरा*h* मिअवहू जदा
[तात, एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूः यदा]

a 1-3 dropping mouthfuls of grass

b 1-3 with their pale leaves falling off

c 2-1 sisterly affection

d 2-1 desired

e 1-1 having no anxieties

f 1-1 trust

g 1-1 ought to be cheered up

h 1-1 slow on account of being big with child

अणघप्पसवा[a] होदि, तदा मे कं पि पिअणिवेदइत्तअं
[अनघप्रसवा भवति, तदा मे कम् अपि प्रियनिवेदयितारं]
विसज्जइस्सध ।
[विसर्जयिष्यथ ।]

काश्यपः—

नेदं विस्मरिष्यामः ।

शकुन्तला—(गतिभङ्गं रूपयित्वा)

को णु क्खु एसो णिवसणे मे सज्जदि[b] ।
[कः नु खलु एषः निवसने मे सज्जति ।]

(इति परावर्तते)

काश्यपः—

वत्से,

यस्य त्वया व्रणविरोपणमिङ्गुदीनां[c]
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको[d] जहाति
सोऽयं न पुत्रकृतकः[e] पदवीं मृगस्ते ॥ ६६ ॥

शकुन्तला—

वच्छ, किं सहवासपरिच्चाइणिं मं अणुसरसि । अचिर-
[वत्स, किं सहवासपरित्यागिनीं माम् अनुसरसि । अचिर-]
प्पसूदाए जणणीए विणा विवड्ढिदो एव्व । दाणिं पि
[प्रसूतया जनन्या विना विवर्धितः एव । इदानीम् अपि]
मए विरहिदं तुमं तादो चिन्तइस्सदि[f] । णिवत्तेहि दाव ।
[मया विरहितं त्वां तातः चिन्तयिष्यति । निवर्तस्व तावत् ।]

(इति रुदती प्रस्थिता)

काश्यपः—

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं[g]
बाष्पं कुरु स्थिरतया विरतानुबन्धम्[h] ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ ६७ ॥

शार्ङ्गरवः—

भगवन्, ओदकान्तात्[i] स्निग्धो जनोऽनुगन्तव्य इति श्रूयते ।
तदिदं सरस्तीरम् । अत्र सन्दिश्य[j] प्रतिगन्तुमर्हसि ।

काश्यपः—

तेन हीमां क्षीरवृक्षच्छायामाश्रयामः ।

(सर्वे परिक्रम्य स्थिताः)

a 1-1 bringing forth without any mishap

b who is it that sticks to my garment?

c 1-1 healer of wounds

d 1-1 reared with handfuls of *Syamaka* grains

e 1-1 adopted as son

f will take care of

g 6-2 having eyelashes turned up

h 2-1 having further production stopped

i आ+उदकान्तात् as far as the water's brink

j having given (us) directions

काश्यपः—(आत्मगतम्)

किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम् ।

(इति चिन्तयति)

शकुन्तला—(जनान्तिकम्)

हला, पेक्ख । णलिणीपत्तन्तरिदं पिअसहअरं अदेक्खन्ती
[हला, प्रेक्षस्व । नलिनीपत्रान्तरितं प्रियसहचरम् अपश्यन्ती]
आदुरा चक्कवाई आरडदि—'दुक्करं अहं करेमि*a*' त्ति ।
[आतुरा चक्रवाकी आरटति—'दुष्करम् अहं करोमि' इति ।]

अनसूया—

सहि, मा एव्वं मन्तेहि ।
[सखि, मा एवं मन्त्रयस्व ।]
एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं*b* ।
[एषा अपि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।]
गरुअं पि विरहदुक्खं आसाबन्धो*c* सहावेइ ॥ ८८ ॥
[गुरुकम् अपि विरहदुःखम् आशाबन्धः साहयति ॥]

काश्यपः—

शार्ङ्गरव, त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य*d* वक्तव्यः ।

शार्ङ्गरवः—

आज्ञापयतु भवान् ।

काश्यपः—

अस्मान्साधु विचिन्त्य संयमधनानुच्चैःकुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां*e* स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं*f* दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ ८९ ॥

शार्ङ्गरवः—

गृहीतः संदेशः ।

काश्यपः—

वत्से, त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा*g* वयम् ।

शार्ङ्गरवः—

न खलु धीमतां कश्चिदविषयो*h* नाम ।

काश्यपः—

सा त्वमितः पतिकुलं प्राप्य

a hard is the lot I suffer

b tardy on account of sorrow

c 1-1 tie of hope; consolation

d having presented

e not in any way brought about by relatives

f honour, respectful behaviour

g 1-3 acquainted with wordly affairs

h 1-1 subject out of reach

४. शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने*a*
भर्तुर्विप्रकृतापि*b* रोषणतया मा स्म प्रतीपं*c* गमः ।
भूयिष्ठं भव दक्षिणा*d* परिजने भाग्येष्वनुत्सेकिनी*e*
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः*f* ॥१००॥

कथं वा गौतमी मन्यते ?

गौतमी—

एत्तिओ वहूजणस्स उवदेसो । जादे, एदं क्खु सव्वं
[एतावान् वधूजनस्य उपदेशः । जाते, एतत् खलु सर्वम्]
ओधारेहि ।
[अवधारय ।]

काश्यपः—

वत्से, परिष्वजस्व मां सखीजनं च ।

शकुन्तला—

ताद, इदो एव्व किं पिअंवदामिस्साओ* सहीओ णि-
[तात, इतः एव किं प्रियंवदामिश्राः सख्यः नि-]
वत्तिस्सन्ति ?
[वर्तिष्यन्ते ?]

काश्यपः—

वत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य)

कहं दाणिं तादस्स अङ्कादो परिब्भट्ठा मलअतडुम्मूलिदा*g*
[कथम् इदानीं तातस्य अङ्कात् परिभ्रष्टा मलयतटोन्मूलिता]
चन्दणलदा विअ देसन्तरे जीविदं धारइस्सं ?
[चन्दनलता इव देशान्तरे जीवितं धारयिष्यामि ?]

काश्यपः—

वत्से, किमेवं कातरासि ?

अभिजनवतो*h* भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला*i* ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ १०१ ॥

(शकुन्तला पितुः पादयोः पतति)

काश्यपः—

यदिच्छामि ते तदस्तु ।

---

a 7-1 co-wife
b though wronged
c against
d 1-1 polite
e 1-1 not arrogant
f bane of the family
* see notes
g 1-1 uprooted from the slopes of *Malaya* mountain
h 6-1 of noble birth
i 1-1 busy

शकुन्तला—(सख्यावुपेत्य)

हला, दुवे वि मं समं एव्वa परिस्सजध।
[हला, द्वे अपि मां समम् एव परिष्वजेथाम्।]

सख्यौ—(तथा कृत्वा)

सहि, जइ णाम सो राआ पच्चहिण्णाणमन्थरोb भवे, तदो
[सखि, यदि नाम सः राजा प्रत्यभिज्ञानमन्थरः भवेत्, ततः]
से इमं अत्तणामहेअङ्किअं अङ्गुलीअअं दंसेहि।
[असौ इदम् आत्मनामधेयाङ्कितम् अङ्गुलीयकं दर्शय।]

शकुन्तला—

इमिणा सन्देहेण वो आकम्पिदc म्हि।
[अनेन सन्देहेन वाम् आकम्पिता अस्मि।]

सख्यौ—

मा भाआहि। अदिसिणेहो पावसङ्कीf।
[मा बिभीहि। अतिस्नेहः पापशङ्की।]

शार्ङ्गरवः—

युगान्तरमारूढःg सविता। त्वरतामत्रभवती।

शकुन्तला—(आश्रमाभिमुखी स्थित्वा)

ताद, कदा णु भूओ तवोवणं पेक्खिस्सं?
[तात, कदा नु भूयः तपोवनं प्रेक्षिष्ये?]

काश्यपः—

श्रूयताम्।

> भूत्वा चिराय चतुरन्तमहीसपत्नीh
> दौष्यन्तिमप्रतिरथंi तनयं निवेश्य।
> भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
> शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥ १०२॥

गौतमी—

जादे, परिहीअदि गमणवेला। णिवत्तेहि पिदरं। अधवा
[जाते, परिहीयते गमनवेला। निवर्तय पितरम्। अथवा]
चिरेण वि पुणो पुणो एसा एव्वं मन्तइस्सदि। णिवत्तदु
[चिरेण अपि पुनः पुनर् एषा एवं मन्त्रयिष्यते। निवर्तताम्]
भवं।
[भवान्।]

काश्यपः—

वत्से, उपरुध्यतेj तपोऽनुष्ठानम्।

a simultaneously
b 1-1 slow to recognise
c 1-1 shocked
f excessive affection is apt to suspect evil
g ascended to another division of the sky, see notes also
h 1-1 co-wife of the earth bounded by four cardinal points
i 2-1 *Dushyanta's* son
j is interrupted

शकुन्तला—(भूयः पितरमाश्लिष्य)

तवच्चरणपीडिदं*a* तादसरीरं । ता मा अदिमेत्तं मम किदे
[तपश्चरणपीडितं तातशरीरम् । तद् मा अतिमात्रं मम कृते]
उक्कण्ठ ।
[उत्कण्ठस्व ।] ।विरूढस्तु संजाताङ्कुरे ऽन्यवत्—इति विश्वः।

काश्यपः—(सनिःश्वासम्)

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्*b* ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥ १०३ ॥

गच्छ । शिवास्ते पन्थानः सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च)

सख्यौ—(शकुन्तलां विलोक्य)

हद्धी हद्धी । अन्तलिहिदा*c* सउन्दला वणराईए ।
[हाधिक् हाधिक् । अन्तर्हिता शकुन्तला वनराज्या ।]

काश्यपः—(सनिःश्वासम्)

अनसूये, गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे—

ताद, सउन्दलाविरहिदं सुण्णं विअ तवोवणं कधं पविसामो ?
[तात, शकुन्तलाविरहितं शून्यम् इव तपोवनं कथं प्रविशावः ?]

काश्यपः—

स्नेहप्रवृत्तिरेवंदर्शिनी*d* । (सविमर्शं परिक्रम्य) हन्त भोः । शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः : my natural serenity.

अर्थो*e* हि कन्या परकीय*f* एव
तामद्य संप्रेष्य परिग्रहीतुः*g* । परिग्रहः पत्नी-
जातो ममायं विशदः*h* प्रकामं प्रसन्नः
प्रत्यर्पितन्यास*i* इवान्तरात्मा ॥१०४॥

(इति निष्क्रान्ताः सर्वे)

॥ इति चतुर्थोऽङ्कः ॥

a 1-1 emaciated by the practice of penance
b 2-1 formerly offered
c 1-1 concealed
d 1-1 course of affection views it thus
e 1-1 property
f 1-1 another's
g 6-1 husband
h 1-1 clear; calm
i 1-1 who has returned the deposit

॥ अथ पञ्चमोऽङ्कः ॥

(ततः प्रविशत्यासनस्थो राजा विदूषकश्च)

विदूषकः—(कर्णं दत्त्वा)

भो भो वअस्स, सङ्गीदसालन्तरे अवधाणं देहि*a*। कल-
[भोः भोः वयस्य, संगीतशालान्तरे अवधानं देहि। कल-]
विसुद्धाए*b* गीदीए सरसंजोओ सुणीअदि। जाणे, तत्तहोदी
[विशुद्धायां गीत्यां स्वरसंयोगः श्रूयते। जाने, तत्रभवती]
हंसवदिआ वण्णपरिअअं*c* करेदि त्ति।
[हंसपदिका वर्णपरिचयं करोति इति।]

राजा—

तूष्णीं भव। यावदाकर्णयामि।

(आकाशे गीयते)

अहिणवमहुलोलुवो तुमं, तह परिचुम्बिअ चूअमञ्जरिं।
[अभिनवमधुलोलुपः त्वं, तथा परिचुम्ब्य चूतमञ्जरीम्।]
कमलवसइमेत्तणिव्वुओ*d*, महुअर वीसरिओ सि णं कहं॥१०५
[कमलवसतिमात्रनिर्वृतः, मधुकर विस्मृतः असि एनां कथम्॥]

राजा—

अहो रागपरिवाहिणी*e* गीतिः।

विदूषकः—

किं दाव गीदीए अवगदो अक्खरत्थो ?
[किं तावद् गीत्या अवगतः अक्षरार्थः ?]

राजा—(स्मितं कृत्वा)

सकृत्कृतप्रणयोऽयं जनः*f*। तदस्या देवीं वसुमतीमन्तरेण महदु-
पालम्भनं गतोऽस्मि। सखे माठव्य, मद्वचनादुच्यतां हंसपदिका
निपुणमुपालब्धोऽस्मीति।

विदूषकः—

जं भवं आणवेदि। (उत्थाय) भो वअस्स, गहीदस्स
[यद् भवान् आज्ञापयति। भोः वयस्य, गृहीतस्य]
ताए परकीएहिं हत्थेहिं सिहण्डए*g* ताडीअमाणस्स अच्छ-
[तया परकीयैः हस्तैः शिखण्डके ताड्यमानस्य अप्स-]
राए वीदराअस्स विअ ण त्थि दाणिं मे मोक्खो।
[रया वीतरागस्य इव न अस्ति इदानीं मे मोक्षः।]

राजा—

गच्छ, नागरिकवृत्त्या*h* संज्ञापयैनाम्।

a turn thy attention to the interior of the music hall
b 7-1 sweet and clear
c 2-1 acquaintance with musical modes, *i.e.*, practice in singing
d 1-1 satisfied with a mere dwelling in the lotus
e 1-1 overflowing with love
f I once loved this person *i.e.*, *Hamsapadika*
g 7-1 tuft of hair on the head. It goes with गहीदस्स *i.e.*, seized by the सिहंडअ *cf.* गृहीत इव केशेषु मृत्युना *Hitopadesa*
h 3-1 manner of a citizen

विदूषकः—

का गई।

[का गतिः।]

(इति निष्क्रान्तः)

राजा—(आत्मगतम्)

किं नु खलु गीतार्थमाकर्ण्येष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा,

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकी भवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं^{a}
भावस्थिराणि^{b} जननान्तरसौहृदानि^{c} ॥ १०६ ॥

(इति पर्याकुलस्तिष्ठति)

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—

अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि।

आचार^d इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे^{e} मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्थम् ॥ १०७ ॥

भोः कामं धर्मकार्यमनतिपात्यं^{f} देवस्य। तथापीदानीमेव धर्मासनादुत्थितस्य^g पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा, अविश्रामोऽयं लोकतन्त्राधिकारः^{h}। कुतः,

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि^{i} धर्म एषः ॥१०८॥

यावन्नियोगमनुतिष्ठामि। (परिक्रम्यावलोक्य च) एष देवः।

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा^{j}
निषेवते श्रान्तमना विविक्तम्^{k}।
यूथानि संचार्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः ॥१०९॥

(उपगम्य) जयतु जयतु देवः। एते खलु हिमवतो गिरेरुपत्यकारण्यवासिनः काश्यपसंदेशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम्।

a unconsciously
b 2·3 permanently existing in the heart
c 2·3 friendships of past lives
d 1·1 custom
e 7·1 long. The affix तिथुक् is added to denote measure or length
f 1·1 not to be delayed
g 5·1 seat of judgment
h office of public administration admits of no repose
i 6·1 lit. living upon the sixth part i.e., tax; king
j having governed
k 2·1 solitude

राजा—(सादरम्)

किं काश्यपसंदेशहारिणः?

कञ्चुकी—

अथ किम्।

राजा—

तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः* सोमरातः। अमूना-श्रमवासिनः श्रौतेन*a* विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

* See notes

a 3-1 prescribed by the scriptures

कञ्चुकी—

यदाज्ञापयति देवः।

(इति निष्क्रान्तः)

राजा—(उत्थाय)

वेत्रवति, अग्निशरणमार्गमादेशय।

प्रतीहारी—

इदो इदो देवो।
[इतः इतः देवः।]

राजा—(परिक्रामति। अधिकारखेदं निरूप्य)

सर्वः प्रार्थितमर्थमधिगम्य सुखी संपद्यते जन्तुः। राज्ञां तु चरितार्थता*b* दुःखोत्तरैव*c*।

औत्सुक्यमात्रमवसादयति प्रतिष्ठा*d*
क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम्*e* ॥११०॥

b 1-1 success in their object
c 1-1 followed by pain
d 1-1 attainment of high dignity
e like an umbrella the handle of which is held in hand

(नेपथ्ये)

वैतालिकौ*—

* See notes

विजयतां देवः।

प्रथमः—

स्वसुखनिरभिलाषः*f* खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं*g*
शमयति परितापं छायया संश्रितानाम् ॥१११॥

f 1-1 indifferent to your own comforts

g excessive heat

द्वितीयः—

नियमयसि विमार्गप्रस्थितानात्तदण्डः*h*
प्रशमयसि विवादं कल्पसे रक्षणाय*i*।

h 1-1 holding the sceptre
i you are able to protect (your) subjects

अतनुषु[a] विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं[b] प्रजानाम् ॥११२॥

राजा—

एते क्लान्तमनसः पुनर्नवीकृताः स्मः । (इति परिक्रामति)

प्रतीहारी—

अहिणवसम्मज्जणसस्सिरीओ[c] सण्णिहिदहोमधेणू अग्गिसरणा-
[अभिनवसम्मार्जनसश्रीकः सन्निहितहोमधेनुः अग्निशरणा-]
लिन्दो[d] । आरुहदु देवो ।
[लिन्दः । आरोहतु देवः ।]

राजा—(आरुह्य परिजनांसावलम्बी तिष्ठति)

वेत्रवति, किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेरिताः स्युः ?

किं तावद् व्रतिनामुपोढतपसां[e] विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ।
आहो स्वित्प्रसवो ममापचरितैर्विष्टम्भितो[f] वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं[g] मे मनः ॥११३॥

प्रतीहारी—

सुअरिदणन्दिणो इसीओ देवं सभाजइदुं[h] आअद त्ति
[सुचरितनन्दिनः ऋषयः देवं सभाजयितुम् आगताः इति]
तक्केमि ।
[तर्कयामि ।]

(ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः । पुरश्चैषां कञ्चुकी पुरोहितश्च)

कञ्चुकी—

इत इतो भवन्तः ।

शार्ङ्गरवः—

शारद्वत,

महाभागः कामं नरपतिरभिन्नस्थितिरसौ[i]
न कश्चिद्वर्णानामपथमपकृष्टोऽपि[j] भजते ।
तथापीदं शश्वत्परिचितविविक्तेन[k] मनसा
जनाकीर्णं मन्ये हुतवहपरीतं[l] गृहमिव ॥११४॥

शारद्वतः—

स्थाने भवान्पुरप्रवेशादित्थंभूतः संवृत्तः । अहमपि

---

a 1-3 not meagre; abundant
b 1-1 duty of a kinsman
c 1 1 beautiful because recently cleaned
d 1-1 terrace of fire-sanctuary
e 6-3 having penance accumulated
f 3-3 sin
g 1-1 beset with many misgivings
h to pay homage; to greet
i 1-1 not swerving from rectitude
j even the lowest
k 3-1 perpetually accustomed to seclusion
l 2-1 enveloped in flames

अभ्यक्तमिव*a* स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह*b* सुखसङ्गिनमवैमि ॥११५॥

शकुन्तला—(निमित्तं सूचयित्वा)

अम्महे, किं मे वामेदरं*c* णअणं विप्फुरदि ।
[अहो, किं मे वामेतरं नयनं विस्फुरति ।]

गौतमी—

जादे, पडिहदं अमङ्गलं । सुहाइं दे भत्तुकुलदेवदाओ
[जाते, प्रतिहतम् अमङ्गलम् । शुभानि ते भर्तृकुलदेवताः]
वितरन्तु ।
[वितरन्तु ।]

(इति परिक्रामति)

पुरोहितः—(राजानं निर्दिश्य)

भो भोस्तपस्विनः, असावत्रभवान्वर्णाश्रमाणां रक्षिता*d* प्रागेव मुक्तासनो वः प्रतिपालयति । पश्यतैनम् ।

शार्ङ्गरवः—

भो महाब्राह्मण, काममेतदभिनन्दनीयम् । तथापि वयमत्र मध्यस्थाः*e* । कुतः,

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्भूरिविलम्बिनो*f* घनाः ।
अनुद्धताः*g* सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥११६॥

प्रतीहारी—

देव, पसण्णमुहवण्णा दीसन्ति । जाणामि विस्सद्धकज्जा*h*
[देव, प्रसन्नमुखवर्णाः दृश्यन्ते । जानामि विश्रब्धकार्याः]
इसीओ ।
[ऋषयः ।]

राजा—(शकुन्तलां दृष्ट्वा)

अथात्रभवती ।

का स्विदवगुण्ठनवती*i* नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥११७॥

प्रतीहारी—

देव, कुदूहलगब्भो*j* पडिहदो ण मे तक्को पसरदि । णं
[देव, कुतूहलगर्भः प्रतिहतः न मे तर्कः प्रसरति । ननु]

a 2·1 smeared with dust
b 1·1 having free motion
c 1·1 right ; not left
d protector of all classes and orders
e we are indifferent in this matter
f 1·3 hanging down the more
g 1·3 not elated
h 1·3 having some quiet and easy business
i 1·1 veiled
j 1·1 full of curiosity

दंसणीआ उण से आकिदी लक्खीअदि ।]
[दर्शनीया पुनर् अस्याः आकृतिः लक्ष्यते ।]

राजा—

भवतु । अनिर्वर्णनीयं*a* परकलत्रम् ।

शकुन्तला—(हस्तमुरसि कृत्वा । आत्मगतम्)

हिअअ, किं एव्वं वेवासि ? अज्जउत्तस्स भावं ओधारिअ*b*
[हृदय, किम् एवं वेपसे ? आर्यपुत्रस्य भावम् अवधार्य]
धीरं दाव होहि ।
[धीरं तावद् भव ।]

पुरोहितः—(पुरो गत्वा)

एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्यायसंदेशः । तं देवः श्रोतुमर्हति ।

राजा—

अवहितोस्मि ।

ऋषयः—(हस्तानुद्यम्य)

विजयस्व राजन् ।

राजा—

सर्वानभिवादये ।

ऋषयः—

इष्टेन युज्यस्व ।

राजा—

अपि निर्विघ्नतपसो मुनयः ?

ऋषयः—

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ*c* कथमाविर्भविष्यति ॥ ११८ ॥

राजा—

अर्थवान् खलु मे राजशब्दः*d* । अथ भगवाँल्लोकानुग्रहाय कुशली काश्यपः ?

ऋषयः—

स्वाधीनकुशलाः*e* सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकम्*f* इदमाह ।

राजा—

किमाज्ञापयति भगवान् ?

शार्ङ्गरवः—

यन्मिथःसमयादिमां मदीयां दुहितरं भवानुपायंस्त*g* । तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः,

a I-1 ought not to be looked at

b having called to mind

c 7-1 sun

d my title of *Rajan* is indeed significant

e 1-3 having prosperity in their power

f with inquiries about your welfare

g you married

त्वमर्हताम्a प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया ।
समानयंस्तुल्यगुणंb वधूवरं
चिरस्य वाच्यं न गतःc प्रजापतिः ॥११९॥

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्मचरणायेतिd ।

गौतमी—

अज्ज, किं पि वत्तुकाम म्हि । ण मे वअणावसरोe
[आर्य, किम् अपि वक्तुकामा अस्मि । न मे वचनावसरः]
अत्थि । कहं त्ति ।
[अस्ति । कथम् इति ।]
णावेक्खिओ गुरुअणो इमाअ ण तुए वि पुच्छिओ बन्धू ।
[नावेक्षितः गुरुजनः अनया न त्वया अपि पृष्टः बन्धुः ।]
एक्कक्कमेणf चरिए किं भणउ एक्कमेक्कस्स ॥१२०॥
[एकैकमेन चरिते किं भणतु एकैकस्य ॥]

शकुन्तला—(आत्मगतम्)

किं णु क्खु अज्जउत्तो भणादि ।
[किं नु खलु आर्यपुत्रः भणति ।]

राजा—

किमिदमुपन्यस्तम्g ?

शकुन्तला—(आत्मगतम्)

पावओ क्खु एसो वअणोवण्णासो ।
[पावकः खलु एषः वचनोपन्यासः ।]

शार्ङ्गरवः—

कथमिदं नाम । भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताःh ।
सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
तदप्रियापि प्रमदा स्वबन्धुभिः ॥१२१॥

राजा—

किं चात्रभवती मया परिणीतपूर्वाi ?

शकुन्तला—(सविषादम् । आत्मगतम्)

हिअअ, सम्पदं दे आसङ्का ।
[हृदय, साम्प्रतं ते आशङ्का ।]

शार्ङ्गरवः—

किं कृतकार्यद्वेषाद्धर्मंj प्रति विमुखतोचिता राज्ञः ?

a 6.3 adorable
b 1.1 bringing together
c has incurred no censure
d 4.1 joint performance of religious rites
e 1.1 time for speaking
f 3.1 secret rite i.e., गान्धर्व विवाह
g What is it that you propose ?
h 1.3 fully acquainted with the ways of the world
i married by me before
j on account of dislike to a previous act

राजा—

कुतोऽयमसत्कल्पनाप्रश्नःa ?

शार्ङ्गरवः—

मूर्छन्त्यमी विकाराःb प्रायेणैश्वर्यमत्तेषु ।

राजा—

विशेषेणाधिक्षिप्तोऽस्मिc ।

गौतमी—

जादे, मुहुत्तअं मा लज्ज। अवणइस्सं दाव दे ओउण्ठणं।
[जाते, मुहूर्तं मा लज्जस्व। अपनेष्यामि तावद् ते अवगुण्ठनम्।]
तदो तुमं भट्टा अहिजाणिस्सदिd।
[ततः त्वां भर्ता अभिज्ञास्यति।]

(इति यथोक्तं करोति)

राजा—(शकुन्तलां निर्वर्ण्य। आत्मगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्तिe
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन्।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न खलु च परिभोक्तुं नैव शक्नोमि हातुम्॥ १२२॥

(इति विचारयन्स्थितः)

प्रतीहारी—

अहो धम्मावेक्खिदाf भट्टिणो। ईदिसं णाम सुहोवणदं
[अहो धर्मावेक्षिता भर्तुः। ईदृशं नाम सुखोपनतं]
रूवं देक्खिअ को अण्णो विआरेदि।
[रूपं दृष्ट्वा कः अन्यः विचारयति।]

शार्ङ्गरवः—

भो राजन्, किमिति जोषमास्यतेg।

राजा—

भोस्तपोधनाः, चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि। तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिणमाशङ्कमानःh प्रतिपत्स्ये ?

शकुन्तला—(अपवार्य)

अज्जस्स परिणए एव्व सन्देहो। कुदो दाणिं मे दूराहि-
[आर्यस्य परिणये एव संदेहः। कुतः इदानीं मे दूराधि-]
रोहिणीi आसा।
[रोहिणी आशा।]

a whence is this inquiry about a false fabrication ?

b 1·3 change of purpose

c I am reproved with too great a severity

d will recollect

e 1·1 of unblemished beauty

f 1·1 regard for duty

g why do you sit so silent ?

h doubting myself to be her husband

i 1·1 high-flown

शार्ङ्गरवः—

मा तावत्

कृताभिमर्शामनुमन्यमानः *a*

सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं*b* प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि*c* येन ॥ १२३ ॥

शारद्वतः—

शार्ङ्गरव, विरम त्वमिदानीम् । शकुन्तले, वक्तव्यमुक्तमस्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै प्रत्ययप्रतिवचनम्*d* ।

शकुन्तला—(अपवार्य)

इमं अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमराविदेण ।
[इदम् अवस्थान्तरं गते तादृशे अनुरागे किं वा स्मारितेन ।]
अत्ता दाणिं मे सोअणीओ त्ति ववसिदं । (प्रकाशम्)
[आत्मा इदानीं मे शोचनीयः इति व्यवसितम् ।]
अज्जउत्त । (इत्यर्धोक्ते) संसइदे दाणिं परिणए ण एसो
[आर्यपुत्र । संशयिते इदानीं परिणये न एषः]
समुदाआरो*e* । पोरव, ण जुत्तं णाम दे तधा पुरा अस्समपदे
[समुदाचारः । पौरव, न युक्तं नाम ते तथा पुरा आश्रमपदे]
सहावुत्ताणहिअअं*f* इमं जणं समअपुव्वं पतारिअ ईदिसेहिं
[स्वभावोत्तानहृदयम् इमं जनं समयपूर्वं प्रतार्य ईदृशैः]
अक्खरेहिं पच्चाचक्खिदुं*g* ।
[अक्षरैः प्रत्याचष्टुम् ।]

राजा—(कर्णौ पिधाय)

शान्तं पापम् ।

व्यपदेशमाविलयितुं*h* किमीहसे जनमिमं च पातयितुम् ।
कूलङ्कषेव*i* सिन्धुः प्रसन्नमम्भस्तटतरुं च ॥१२४॥

शकुन्तला—

होदु । जइ परमत्थदो परपरिग्गहसङ्किणा*j* तुए एव्वं
[भवतु । यदि परमार्थतः परपरिग्रहशङ्किना त्वया एवं]
पउत्तं, ता अहिण्णाणेण इमिणा तुह आसङ्कं अवणइस्सं ।
[प्रयुक्तम्, तद् अभिज्ञानेन अनेन तव आशङ्काम् अपनेष्यामि।]

राजा—

उदारः कल्पः*k* ।

---

a 2-1 seduced

b 2-1 stolen. *Sakuntala* was married by *Dushyanta* while *Kanva* was not at home

c 1-1 robber

d 1-1 reply that will convince him

e 1-1 proper form of address

f 2-1 naturally open-hearted

g to discard, reject

h 2-1 व्यपदिश्यते अनेन that by which a person is distinguished; family; title

i 1-1 that corrodes the banks

j 3-1 believing (me) to be the wife of another

k an excellent idea

शकुन्तला—(मुद्रास्थानं परामृश्य)

हद्धी, हद्धी । अङ्गुलीअअसुरणा मे अङ्गुली ।
[हाधिक् हाधिक् । अङ्गुलीयकशून्या मे अङ्गुलिः ।]

(इति सविषादं गौतमीमवेक्षते)

गौतमी—

णूणं दे सक्कावदारब्भन्तरे*a* सचीतित्थसलिलं*b* वन्दमाणाए
[नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः]
पब्भट्ठं अङ्गुलीअअं ।
[प्रभ्रष्टम् अङ्गुलीयकम् ।]

राजा—(सस्मितम्)

इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते*c* ।

शकुन्तला—

एत्थ दाव विहिणा दंसिदं पहुत्तणं । अवरं दे कधइस्सं ।
[अत्र तावद् विधिना दर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि ।]

राजा—

श्रोतव्यमिदानीं संवृत्तम् ।

शकुन्तला—

णं एक्कदिअसे णोमालिआमण्डवे णलिणीवत्तभाअणगदं
[ननु एकदिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतम्]
उअअं तुह हत्थे सण्णिहिदं आसि ।
[उदकं तव हस्ते सन्निहितम् आसीत् ।]

राजा—

शृणुमस्तावत् ।

शकुन्तला—

तक्खणं सो मे पुत्तकिदओ दीहावङ्गो*d* णाम मिअपोदओ
[तत्क्षणं सः मे पुत्रकृतकः दीर्घापाङ्गः नाम मृगपोतकः]
उवट्ठिदो । तुए अअं दाव पढमं पिवदु त्ति अणुअ-
[उपस्थितः । त्वया अयं तावत् प्रथमं पिबतु इति अनुक-]
म्पिणा उवच्छन्दिदो*e* उअएण । ण उण दे अपरिचआदो
[म्पिना उपच्छन्दितः उदकेन । न पुनः ते अपरिचयात्]
हत्थब्भासं*f* उवगदो । पच्छा तस्सिं जेव्व मए गहिदे
[हस्ताभ्यासम् उपगतः । पश्चात् तस्मिन् एव मया गृहीते]
सलिले णेण किदो पणओ । तदा तुमं इत्थं पहसिदो सि ।
[सलिले अनेन कृतः प्रणयः । तदा त्वम् इत्थं प्रहसितः असि ।]

a a sacred place of pilgrimage where *Indra* descended upon the earth
b a holy bathing place consecrated to *Saci*, *Indra's* wife
c this is what they call the readiness of woman's invention
d 1-1 having eyes with long outer corners
e 1-1 coaxed; enticed
f 2-1 use of the hand

सव्वो सगन्धेसु[a] विस्ससदि । दुवे वि एत्थ आरण्णआ
[सर्वः सगन्धेषु विश्वसिति । द्वौ अपि अत्र आरण्यकौ]
त्ति ।
[इति ।]

राजा—

एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतमयवाङ्मधुभिराकृष्यन्ते[b] विषयिणः ।

गौतमी—

महाभाअ, ण अरुहसि एव्वं मन्तिदुं । तवोवणसंवड्ढिदो
[महाभाग, न अर्हसि एवं मन्त्रयितुम् । तपोवनसंवर्धितः]
अणभिण्णो अअं जणो केदवस्स[c] ।
[अनभिज्ञः अयं जनः कैतवस्य ।]

राजा—

तापसवृद्धे,

स्त्रीणामशिक्षितपटुत्वममानुषीषु[d]
संदृश्यते किमुत याः प्रतिबोधवत्यः[e] ।
प्रागन्तरिक्षगमनात्[f] स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः[g] खलु पोषयन्ति ॥१२५॥

शकुन्तला—(सरोषम्)

अणज्ज, अत्तणो हिअआणुमाणेण[h] पेक्खसि ? को दाणिं
[अनार्य, आत्मनः हृदयानुमानेन प्रेक्षसे ? कः इदानीम्]
अण्णो धम्मकञ्चुअप्पवेसिणो[i] तिणच्छण्णकूवोवमस्स[j] तव
[अन्यः धर्मकञ्चुकप्रवेशिनः तृणच्छन्नकूपोपमस्य तव]
अणुकिदं पडिवज्जिस्सदि ?
[अनुकृतं प्रतिपत्स्यते ?]

राजा—(आत्मगतम्)

संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथा ह्यनया

मय्येव विस्मरणदारुणचित्तवृत्तौ[k]
वृत्तं रहःप्रणयमप्रतिपद्यमाने ।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥१२६॥

(प्रकाशम्) भद्रे, प्रथितं[l] दुष्यन्तस्य चरितम् । तथापीदं न लक्षये ।

शकुन्तला—

सुट्ठु दाव एत्थ सच्छन्दचारिणी[m] किद म्हि । जा अहं
[सुष्ठु तावद् अत्र स्वच्छन्दचारिणी कृता अस्मि । या अहम्]

---

a 7-3 relative
b 6-3 trying to accomplish their own end
c 6-1 deceit
d 1-1 untaught subtlety
e 1-3 gifted with intelligence
f before soaring in the sky
g 1-3 cuckoo
h 3-1 standard of thy own heart
i 6-1 putting on the garb of virtue
j 6-1 resembling a well hidden under grass
k 7-1 whose attitude is severe through want of recollection
l 1-1 well known
m 1-1 wilful; self-willed

इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअअट्ठिदविसस्स
[अस्य पुरुवंशप्रत्ययेन मुखमधोः हृदयस्थितविषस्य]
हत्थब्भासं उवगदा ।
[हस्ताभ्यासम् उपगता ।]

(इति पटान्तेन मुखमावृत्य रोदिति)

शार्ङ्गरवः—

इत्थमात्मकृतमप्रतिहतं चापलं दहति*a* ।

अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः ।
अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम् ॥१२७॥

राजा—

अयि भोः, किमत्रभवतीप्रत्ययादेवास्मान् सम्भृतदोषैरधिक्षिपथ*b* ।

शार्ङ्गरवः—(सासूयम्)

श्रुतं भवद्भिरधरोत्तरम् ।

आ जन्मनः शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य ।
परातिसन्धानमधीयते*c* यै-
र्विद्येति ते सन्तु किलाप्तवाचः*d* ॥१२८॥

राजा—

भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमा-
मतिसन्धाय*e* लभ्यते ।

शार्ङ्गरवः—

विनिपातः*f* ।

राजा—

विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत् ।

शारद्वतः—

शार्ङ्गरव, किमुत्तरेण । अनुष्ठितो गुरोः सन्देशः । प्रतिनिवर्तामहे
वयम् । (राजानं प्रति)

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥१२९॥

गौतमी—

गच्छाग्रतः ।

(इति प्रस्थिताः)

शकुन्तला—

कहं इमिणा किदवेण विप्पलद्ध*g* म्हि । तुह्मे वि मं
[कथम् अनेन कितवेन विप्रलब्धा अस्मि । यूयम् अपि मां]

a thus burns self-committed and uncounteracted rashness

b 3-3 accumulated accusation

c 1-1 deceiving of others

d 1-3 worthy of belief ; speaker of truth

e by deceiving her

f 1-1 ruin

g 1-1 deceived

परिदेविणिं[a] परिच्चअध ।
[परिदेविनीं परित्यजथ ।]

(इत्यनुप्रतिष्ठते)

गौतमी—(स्थित्वा)

वच्छ सङ्गरव, अणुगच्छादि इअं क्खु णो करुणपरिदेविणी
[वत्स शार्ङ्गरव, अनुगच्छति इयं खलु नः करुणपरिदेविनी]
सउन्दला । पच्चादेसपरुसे[b] भत्तुणि किं वा मे पुत्तिआ
[शकुन्तला । प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका]
करिस्सदि ।
[करिष्यति ।]

शार्ङ्गरवः—(सरोषं निवृत्य)

किं पुरोभागिनि स्वातन्त्र्यमवलम्बसे[c] ?

(शकुन्तला भीता वेपते)

शार्ङ्गरवः—

शकुन्तले,

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया[d] त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् ॥१३०॥

तिष्ठ, साधयामो वयम् ।

राजा—

भोस्तपस्विन्, किमत्रभवतीं विप्रलभसे ? कुतः,

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी[e] वृत्तिः ॥१३१॥

शार्ङ्गरवः—

यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवान्, तदा कथमधर्मभीरुः[f] ?

राजा—

भवन्तमेवात्र गुरुलाघवं[g] पृच्छामि ।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः[h] ॥१३२॥

पुरोहितः—(विचार्य)

यदि तावदेवं क्रियताम् ।

राजा—

अनुशास्तु मां भवान् ।

a 2-1 weeping, lamenting

b 7-1 cruel by his repudiation

c 0 naughty girl, dost thou assume independence ?

d 3-1 fallen from the family

e 1-1 averse to embrace the wife of another

f 1-1 afraid of losing the virtue

g 2-1 heavier and the lighter (sin)

h 1-1 defiled by the contact with another's wife

पुरोहितः—

अत्रभवती तावदा प्रसवाद[a] स्मद्गृहे तिष्ठतु। कुत इदमुच्यत इति चेत्, त्वं साधुभिरुद्दिष्टः—'प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति।' स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो[b] भविष्यति, अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्यये[c] तु पितुरस्याः समीपनयनमवस्थितमेव।

राजा—

यथा गुरुभ्यो रोचते।

पुरोहितः—

वत्से, अनुगच्छ माम्।

शकुन्तला—

भअवदि वसुहे, देहि मे विवरं।

[भगवति वसुधे, देहि मे विवरम्[d]।]

(इति रुदती प्रस्थिता। निष्क्रान्ता सह पुरोधसा सह तपस्विभिश्च। राजा शापव्यवहितस्मृतिः[e] शकुन्तलागतमेव चिन्तयति)

नेपथ्ये—

आश्चर्यम्।

राजा—(आकर्ण्य)

किं नु खलु स्यात्।

पुरोहितः—(प्रविश्य सविस्मयम्)

देव, अद्भुतं खलु संवृत्तम्।

राजा—

किमेव[illegible]

पुरोहितः—

देव, परावृत्तेषु कण्वशिष्येषु

सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता।

राजा—

किं च।

पुरोहितः—

स्त्रीसंस्थानं[f] चाप्सरस्तीर्थमारा-
दुत्क्षिप्यैनां ज्योतिरेकं जगाम ॥१३३॥

(सर्वे विस्मयं रूपयन्ति)

राजा—

भगवन्, प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव। किं वृथा तर्केणान्विष्यते। विश्राम्यतु भवान्।

a till delivery

b 1-1 endowed with this mark

c if it be otherwise

d grant me entrance

e 1-1 having lost memory through curse

f 1-1 in the form of a woman

पुरोहितः—(विलोक्य)

विजयस्व ।

(इति निष्क्रान्तः)

राजा—

वेत्रवति, पर्याकुलोऽस्मि । शयनभूमिमार्गमादेशय ।

प्रतीहारी—

इदो इदो देवो ।
[इतः इतः देवः ।]

(इति प्रस्थिता)

राजा—

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव[a] मां हृदयम् ॥१३४॥

(इति निष्क्रान्ताः सर्वे)

[a] forces me, as it were, to believe (her story)

॥ इति पञ्चमोऽङ्कः ॥

॥ अथ पञ्चमषष्ठाङ्कमध्ये प्रवेशकः ॥

(ततः प्रविशति नागरिकः श्यालः* पश्चाद्बद्धपुरुषमादाय रक्षिणौ च)

*see notes

रक्षिणौ—(ताडयित्वा)

अले कुम्भिलआ, कधेहि, कहिं तुए एदे मणिबन्धणुक्किण्णणामहेए लाअकीए अङ्गुलीअए शमाशादिदे ?
[अरे कुम्भिलक, कथय, कुत्र त्वया एतद् मणिबन्धनोत्कीर्णनामधेयं राजकीयम् अङ्गुलीयकं समासादितम् ?]

पुरुषः—(भीतिनाटितकेन)

पशीदन्तु भावमिश्शा[b] । अहके ण ईदिशकम्मकाली ।
[प्रसीदन्तु भावमिश्राः । अहं न ईदृशकर्मकारी ।]

[b] 1-3 Gentle sirs

प्रथमः—

किं क्खु शोहणे बह्मणे त्ति कदुअ लञ्ञा पलिग्गहे दिण्णे ?
[किं खलु शोभनः ब्राह्मणः इति कृत्वा राज्ञा प्रतिग्रहः दत्तः ?]

पुरुषः—

शुणुध दाणिं । अहके शक्कावदालब्भन्तलवाशी धीवले ।
[शृणुत इदानीम् । अहं शक्रावताराभ्यन्तरवासी धीवरः ।]

द्वितीयः—

पाडच्चला, किं अम्हेहिं जादिं पुच्छिदे ?
[पाटच्चर, किम् अस्माभिः जातिं पृष्टः ?]

श्यालः—
सूअअ*a*, कधेदु सव्वं अणुक्कमेण*b*। मा णं अन्तरा
[सूचक, कथयतु सर्वम् अनुक्रमेण । मा एनम् अन्तरा]
पडिबन्धेध ।
[प्रतिबध्नीतम् ।]

उभौ—
जं आउत्ते आणवेदि । कधेहि ।
[यद् आवुत्तः आज्ञापयति । कथय ।] भगिनीपतिरावुत्तः इत्यमरः ।

पुरुषः—
अहके जालुग्गालादीहिं मच्छबन्धणोवाएहिं*c* कुडुम्बभलणं
[अहं जालोद्गारादिभिः मत्स्यबन्धनोपायैः कुटुम्बभरणं]
उद्गारो बडिश
कलेमि ।
[करोमि ।]

श्यालः—(विहस्य)
विसुद्धो दाणिं आजीवः ।
[विशुद्धः इदानीम् आजीवः ।] विपरीतलक्षणा - निकृष्ट इत्यर्थः

पुरुषः—
भट्टा, मा एवं भण ।
[भर्तः, मा एवं भण ।]
शहजे*d* किल जे वि णिन्दिए ण हु शे कम्म विवज्जणीअए ।
[सहजं किल यद् अपि निन्दितं न खलु तत् कर्म विवर्जनीयम् ।]
पशुमालणकम्मदालुणे अणुकम्पामिदु*e* एव शोत्तिए* ॥१३॥
[पशुमारणकर्मदारुणः अनुकम्पामृदुः एव श्रोत्रियः ॥]

एवेति भिन्नक्रमः । दारुण एवेति - अभिराम

श्यालः—
तदो तदो ?
[ततः ततः ?]

पुरुषः—
एक्कशिं दिअशे खण्डशो लोहिदमच्छके*f* मए कप्पिदे ।
[एकस्मिन् दिवसे खण्डशः रोहितमत्स्यः मया कल्पितः ।]
जाव तश्श उदलब्भन्तले एदं लदणभाशुलं अङ्गुलीअअं
[यावद् तस्य उदराभ्यन्तरे एतद् रत्नभासुरम् अङ्गुलीयकं]
देक्खिदं । पश्चा अहके शे विक्कआए दंशअन्ते गहिदे
[दृष्टम् । पश्चात् अहम् तत् विक्रयाय दर्शयन् गृहीतः]
भावमिश्शेहिं । मालेध वा, मुञ्चेध वा । अअं शे
[भावमिश्रैः । मारयत वा, मुञ्चत वा । अयम् अस्य]

a 8-1 informer
b in due order
c by nets, hooks and other contrivances for catching fish
d 1-1 inborn
e 1-1 tender with compassion
* see notes
f 1-1 kind of fish

खण्डितः । कल्पनं कर्तनं क्लृप्तो— विश्व

अज्ञानतायें ...त्यथा इष्टान्तः । एवं इत्थायें यदा तदोपमा ।

उत्पन्ना कह्यणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥

आअमवुत्तन्ते ।
[आगमवृत्तान्तः ।]

श्यालः—

जाणुअ, विस्सगन्धी[a] गोहादी मच्छबन्धो[b] जेव्व णिस्संसअं ।
[जानुक, विस्रगन्धिः गोघाती मत्स्यबन्धः एव निःसंशयम् ।]
अङ्गुलीअअदंसणं से विमरिसिदव्वं[c] । राअउलं एव्व
[अङ्गुलीयकदर्शनम् अस्य विमर्ष्टव्यम् । राजकुलम् एव]
गच्छामो ।
[गच्छामः ।]

रक्षिणौ—

तधा । गच्छ ले गण्ठिभेदआ[d] ।
[तथा । गच्छ रे ग्रन्थिभेदक ।]

(सर्वे परिक्रामन्ति)

श्यालः—

सूअअ, इमं पुरदुवारे अप्पमत्ता[e] पडिवालेध । जाव इमं
[सूचक, इमं पुरद्वारे अप्रमत्तौ प्रतिपालयतम् । यावद् इदम्]
अङ्गुलीअअं जधागमणं भट्टिणो णिवेदिअ तदो सासणं
[अङ्गुलीयकं यथागमनं भर्तुः निवेद्य ततः शासनं]
पडिच्छिअ[f] णिक्कमामि ।
[प्रतीष्य निष्क्रामामि ।]

उभौ—

पविशदु आउत्ते शामिपशादाअ ।
[प्रविशतु आवुत्तः स्वामिप्रसादाय ।]

(निष्क्रान्तः श्यालः)

प्रथमः—

जाणुअ, चिलाअदि क्खु आउत्ते ।
[जानुक, चिरायति खलु आवुत्तः ।]

द्वितीयः—

णं अवशलोवशप्पणीआ[g] लाआणो ।
[ननु अवसरोपसर्पणीयाः राजानः ।]

प्रथमः—

जाणुअ, फुलन्ति[h] मे हत्था इमश्श वज्झश्श[i] शुमणो
[जानुक, स्फुरतः मे हस्तौ अस्य वध्यस्य सुमनः]
पिणद्धुं[j] ।
[पिनद्धुम् ।]

(इति पुरुषं निर्दिशति)

a 1-1 stinking of raw flesh
b 1-1 Fisherman
c must be investigated
d 8-1 cut-purse, lit. knot-cutter
e 1-3 careful
f having received
g 1-3 accessible at proper time
h itch
i 6-3 victim
j this was a sign of death. A victim had a wreath of flowers tied round his neck.

पुरुषः—

ण अलुहदि भावे अकालणमालणे[a] भविदुं ।
[न अर्हति भावः अकारणमारणः भवितुम् ।]

द्वितीयः—(विलोक्य)

एशे अम्हाणं शामी पत्तहत्थे[b] लाअशाशणं[c] पडिच्छिअ
[एषः नौ स्वामी पत्रहस्तः राजशासनं प्रतीष्य]
इदोमुहे देक्खीअदि । गिद्धबली[d] भविश्शशि शुणो
[इतोमुखः दृश्यते । गृध्रबलिः भविष्यसि शुनः]
मुहं वा देखिश्शशि ।
[मुखं वा द्रक्ष्यसि ।]

श्यालः—(प्रविश्य)

सूअअ, मुञ्चीअदु एसो जालोवजीवी[e] । उववण्णो किल
[सूचक, मुच्यताम् एषः जालोपजीवी । उपपन्नः किल]
अअं अङ्गुलीअअस्स आअमो ।
[अयम् अङ्गुलीयकस्य आगमः ।]

सूचकः—

जधा आउत्ते भणादि ।
[यथा आवुत्तः भणति ।]

द्वितीयः—

एशे जमशदणं[f] पविशिअ पडिणिवुत्ते ।
[एषः यमसदनं प्रविश्य प्रतिनिवृत्तः ।]

(इति पुरुषं मुक्तपरिबन्धनं करोति)

पुरुषः—(श्यालं प्रणम्य)

भट्टा, अध कीलिशे मे आजीवे[g] ?
[भर्तः, अथ कीदृशः मे आजीवः ?]

श्यालः—

एसो भट्टिणा अङ्गुलीअअमुल्लसम्मिदो[h] पसादो[i] वि दाविदो।
[एषः भर्त्रा अङ्गुलीयकमूल्यसम्मितः प्रसादः अपि दापितः ।]

(इति पुरुषायार्थं प्रयच्छति)

पुरुषः—(सप्रणामं प्रतिगृह्य)

भट्टकेण अणुग्गहिद म्हि ।
[भर्त्रा अनुगृहीतः अस्मि ।]

---

a 1-1 one that kills another without any cause

b 1-1 with a paper in his hand

c 2-1 royal command

d 1-1 food for the vultures

e 1-1 fisherman

f 2-1 abode of *Yama*; hell

g 1-1 livelihood

h 1-1 equal to the value of the ring

i 1-1 gift

अपि शब्दो मोक्षं समुच्चिनोति ।

सूचकः—

एशे णाम अणुग्गहिदे जे शूलादो[a] अवदालिअ हत्थिक्खन्धे
[एषः नाम अनुगृहीतः यः शूलात् अवतार्य हस्तिस्कन्धे]
पडिट्ठाविदे ।
[प्रतिष्ठापितः ।]

जानुकः—

आउत्ता, पालिदोशिअं[b] कधेदि तेण अङ्गुलीअएण भट्टिणो
[आवुत्त, पारितोषिकं कथयति तेन अङ्गुलीयकेन भर्तुः]
शम्मदेण[c] होदव्वं ।
[सम्मतेन भवितव्यम् ।]

श्यालः—

ण तस्सिं महारुहं[d] रदणं भट्टिणो बहुमदं त्ति तक्केमि ।
[न तस्मिन् महार्हं रत्नं भर्तुः बहुमतम् इति तर्कयामि ।]
तस्स दंसणेण भट्टिणो अभिमदो जणो सुमरिदो । मुहुत्तअं
[तस्य दर्शनेन भर्तुः अभिमतः जनः स्मृतः । मुहूर्तकं]
पकिदिगम्भीरो[e] वि पज्जुस्सुअमणो[f] आसि ।
[प्रकृतिगम्भीरः अपि पर्युत्सुकमनाः आसीत् ।]

सूचकः—

शेविदं णाम आउत्तेण ।
[सेवितं नाम आवुत्तेण ।]

जानुकः—

णं भणाहि । इमश्श किदे मच्छिआभत्तुणो[g] त्ति ।
[ननु भण । अस्य कृते मात्स्यिकाभर्तुः इति]

(इति पुरुषमसूयया पश्यति)

पुरुषः—

भट्टालका, इदो अद्धं तुम्हाणं शुमणोमुल्लं[h] होदु ।
[भट्टारकाः, इतः अर्धं युष्माकं सुमनोमूल्यं भवतु ।]

जानुकः—

एत्तके जुज्जइ ।
[एतावद् युज्यते ।]

श्यालः—

धीवर, महत्तरो तुमं पिअवअस्सको दाणिं मे संवुत्तो ।
[धीवर, महत्तरः त्वं प्रियवयस्यकः इदानीं मे संवृत्तः ।]

a 5-1 stake ; gallows
b 1-1 gift
c 3-1 liked ; favourite
d 1-1 of high value
e 1-1 naturally reserved
f 1-1 agitated in mind
g 6-1 husband of a fish-woman
h 1-1 price of flower (for binding about my head) or something worth a flower

कादम्बरीसाक्खिअं^{a} अम्हाणं पढमसोहिदं इच्छीअदि। ता
[कादम्बरीसाक्षिकम् अस्माकं प्रथमसौहृदम् इष्यते। तत्]
सोण्डिआवणं^{b} जेव्व गच्छामो।
[शौण्डिकापणम् एव गच्छामः।]

सर्वे—

तथा।
[तथा।]

(इति निष्क्रान्ताः सर्वे)

॥ प्रवेशकः ॥

॥ अथ षष्ठोऽङ्कः ॥

(ततः प्रविशत्याकाशयानेन^{c} सानुमती नामाप्सराः)

सानुमती—

णिव्वत्तिदं मए पज्जाअणिव्वत्तणीअं^{d} अच्छरातित्थसाण्णिज्झं^{e}।
[निर्वर्तितं मया पर्यायनिर्वर्तनीयम् अप्सरस्तीर्थसान्निध्यम्। स]
जाव साहुजणस्स अभिसेअकालो^{f} त्ति सम्पदं इमस्स
[यावत् साधुजनस्य अभिषेककालः इति। साम्प्रतम् अस्य]
राएसिणो उदन्तं^{g} पच्चक्खी करिस्सं^{h}। णं मेणआसम्बन्धेण
[राजर्षेः उदन्तं प्रत्यक्षी-करिष्यामि। ननु मेनकासम्बन्धेन]
सरीरभूदा दाणिं मे सउन्दला। ताए अ दुहिदुणिमित्तं
[शरीरभूता इदानीं मे शकुन्तला। तया च दुहितृनिमित्तम्]
आदिट्ठपुव्व म्हि। (समन्तादवलोक्य) किं णु क्खु उदुच्छवे^{i}
[आदिष्टपूर्वा अस्मि। किं नु खलु ऋतूत्सवे]
वि णिरुच्छवारम्भं विअ एदं राउलं दीसदि। अत्थि
[अपि निरुत्सवारम्भम् इव एतद् राजकुलं दृश्यते। अस्ति]
मे विहवो पणिधाणेण^{j} सव्वं परिण्णादुं। किन्तु सहीए
[मे विभवः प्रणिधानेन सर्वं परिज्ञातुम्। किन्तु सख्याः]
आदरो मए माणइदव्वो। होदु। इमाणं जेव्व उज्जाणपा-
[आदरः मया मानयितव्यः। भवतु। अनयोः एव उद्यानपा-]
लिआणं तिरक्करिणीपरिच्छण्णा^{k} पासपरिवत्तिणी भविअ
[लिकयोः तिरस्करिणीपरिच्छन्ना पार्श्वपरिवर्तिनी भूत्वा]
उवलम्भिस्सं।
[उपलप्स्ये।]

a 1-1 attested over some liquor : *kadambari* is a sort of wine. It is distilled from *kadmba* flowers.
b 2-1 liquor shop
c 3-1 airy car
d 1-1 to be performed by turns
e 1-1 attendance at *Apsarastirtha*
f 1-1 bathing time
g 2-1 news
h I will ascertain it with my eyes
i 7-1 great vernal festival It is identified with Holi or Dola-yatra.
j 3-1 meditation
k a kind of magical veil
अन्तर्धानविद्यया परिच्छन्नेति राघव

(इति नाट्येनावतीर्य स्थिता)

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी। अपरा च पृष्ठतस्तस्याः)

प्रथमा—

आअम्बहरिअपण्डुर वसन्तमासस्स जीअसव्वस्सa।

[आताम्रहरितपाण्डुर वसन्तमासस्यb जीवसर्वस्व।

दिट्ठो सि चूअकोरअ उदुमङ्गलं तुमं पसाएमि ॥१३६॥

[दृष्टः असि चूतकोरक ऋतुमङ्गलं त्वां प्रसादयामि ॥]

द्वितीया—

परहुदिएc, किं एआइणी मन्तेसि?

[परभृतिके, किम् एकाकिनी मन्त्रयसे?]

प्रथमा—

महुअरिए, चूदकलिअं देक्खिअ उम्मत्तिआ परहुदिआ

[मधुकरिके, चूतकलिकां दृष्ट्वा उन्मत्तिका परभृतिका]

होदि।

[भवति।]

द्वितीया—(सहर्षं त्वरयोपगम्य)

कधं उवट्ठिदो महुमासोd।

[कथम् उपस्थितः मधुमासः।]

प्रथमा—

महुअरिए, तव दाणिं कालो एसो मदविब्भमगीदाणं।

[मधुकरिके, तव इदानीं कालः एषः मदविभ्रमगीतानाम्।]

द्वितीया—

सहि, अवलम्ब मं। जाव अग्गपादट्ठिदाe भविअ

[सखि, अवलम्बस्व माम्। यावद् अग्रपादस्थिता भूत्वा]

चूदकलिअं गेण्हिअ कामदेवच्चणं करेमि।

[चूतकलिकां गृहीत्वा कामदेवार्चनं करोमिf।]

प्रथमा—

जइ मम वि क्खु अद्धं अच्चणफलस्स।

[यदि मम अपि खलु अर्धम् अर्चनफलस्य।]

द्वितीया—

अकधिदे वि एदं सम्पज्जदि। जदो एक्कं जेव्व णो जीविदं।

[अकथिते अपि एतत् सम्पद्यते। यतः एकम् एव नौ जीवितम्।]

दुधाठिदं सरीरं। (सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णाति)

[द्विधास्थितं शरीरम्।]

a 8-1 essence of life
b 8-1 mango-blossom
c play upon word
1. Personal name
2. Cuckoo
d 1-1 spring
e 1-1 standing on tip-toe
f 2-1 worship of *Kamadeva*, the god of love

अए, अप्पडिबुद्धो वि[a] चूदप्पसवो एत्थ बन्धणभङ्गसुरही
[अये, अप्रतिबुद्धः अपि चूतप्रसवः अत्र बन्धनभङ्गसुरभिः]
होदि । (कपोतहस्तकं[b] कृत्वा)
[भवति ।]

तुं सि मए चूअङ्कुर दिण्णो कामस्स गहिअधणुअस्स ।
[त्वम् अपि मया चूताङ्कुर दत्तः कामस्य गृहीतधनोः ।]
पहिअजणजुवइलक्खो[c] पञ्चब्भहिओ सरो होहि ॥१३७॥
[पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरः भव ॥]

(इति चूताङ्कुरं क्षिपति)

कञ्चुकी—(प्रविश्य पटाक्षेपेण कुपितः)
मा तावदनात्मज्ञे[d] देवेन प्रतिषिद्धे वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे ?

उभे—(भीते)

पसीददु अज्जो । अगहिदत्थाओ अम्हे[e] ।
[प्रसीदतु आर्यः । अगृहीतार्थे आवाम् ।]

कञ्चुकी—

न किल श्रुतं युवाभ्याम् यद्वासन्तिकैस्तरुभिरपि[f] देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च ।
तथाहि

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरवकं तत्कोरकावस्थया[g] ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां[h] रुतं[i]
शङ्के[j] संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं[k] शरम् ॥१३८॥

उभे—

ण त्थि सन्देहो । महप्पहावो राएसी ।
[न अस्ति सन्देहः । महाप्रभावः राजर्षिः ।]

प्रथमा—

अज्ज, कदि दिअसाइं अम्हाणं मित्तावसुणा रट्ठिएण भट्टिणो
[आर्य, कति दिवसानि आवयोः मित्रावसुना राष्ट्रियेण भर्तुः]
पादमूलं पेसिदाणं । इत्थं च णो पमदवणस्स पालणकम्म
[पादमूलं प्रेषितयोः । इत्थं च नौ प्रमदवनस्य पालनकर्म]

a though not quite expanded
b 2-1 a particular mode of joining the hands in supplication
c 1-1 having for his mark ladies whose husbands are gone abroad
d 8-1 thoughtless woman
e we have heard nothing of it
f even by the vernal plants
g 3-1 budding state
h 6-3 male-cuckoo
i 1-1 note; cry
j 1 suspect
k 2-1 half-drawn from quiver

समप्पिदं । ता आअन्तुअदाए*a* अस्सुदपुव्वो*b* अम्हेहिं एसो
[समर्पितम् । तद् आगन्तुकतया अश्रुतपूर्वः आवाभ्याम् एषः]
वुत्तन्तो ।
[वृत्तान्तः ।]

कञ्चुकी—

भवतु । न पुनरेवं प्रवर्तितव्यम् ।

उभे—

अज्ज, कोदूहलं णो । जइ इमिणा जणेण सोदव्वं, कधेदु
[आर्य, कौतूहलं नौ । यदि अनेन जनेन श्रोतव्यम्, कथयतु]
भवं । किं णिमित्तं भट्टिणा वसन्तूसवो पडिसिद्धो*c* ?
[भवान् । किं निमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः ?]

सानुमती—

ऊसवप्पिआ*d* खु मणुस्सा । गुरुणा कारणेण होदव्वं ।
[उत्सवप्रियाः खलु मनुष्याः । गुरुणा कारणेन भवितव्यम् ।]

कञ्चुकी—

बहुलीभूतमेतत् किं न कथ्यते । किमत्रभवत्योः कर्णपथं नायातं
शकुन्तलाप्रत्यादेशकौलीनम्*e* ? स्यात्कौलीनं लोकवादे — इत्यमरः ।

उभे—

सुदं रट्ठिणो*f* मुहादो जाव अङ्गुलीअअदंसणं ।
[श्रुतं राष्ट्रियस्य मुखात् यावद् अङ्गुलीयकदर्शनम् ।]

कञ्चुकी—

तेन ह्यल्पं कथयितव्यम् । यदैव खलु स्वाङ्गुलीयकदर्शना-
दनुस्मृतं देवेन सत्यमूढपूर्वा मया तत्रभवती रहसि शकुन्तला
मोहात्प्रत्यादिष्टेति । तदा प्रभृत्येव पश्चात्तापमुपगतो देवः। तथा हि
amatyas (councillors, ministers). प्रकृतिभिरमात्यैः ।

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र*g* एव क्षपाः*h* ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु*i* स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥१३॥

सक्चन्दनचन्द्रिकादि; अत्यन्तानुरोधेन; cf. Kumara iv. 8.

सानुमती—

दाक्षिण्यं नाम बिम्बोष्ठि बैम्बिकानां कुलव्रतम् ।

पिअं मे ।
[प्रियं मे ।]

कञ्चुकी— प्रमोदः — समयादिति कालादित्यर्थ इति राघवः ।

अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः*j* । — peculiar change in mind. निमनस्

a 3-1 by reason of our being strangers
b 1-1 unheard before
c 1-1 forbidden
d 1-3 fond of festivals
e 1-1 gossip about the rejection of *Sakuntala*
f 6 1 king's brother-in-law
g 3-3 tossing about on the edge of the couch
h 2-3 night
i 7-3 name
j 1-1 prohibited

यथापूर्वं प्रकृतिभिः उभयं विशे... विलक्षः लज्जान्वितः । Also Raghu XIX. 2. नाम तन्मात्रजनस्य ते प्राप्य भाग्यमपि तस्य काङ्क्ष्यते etc.

×. अहं राजा दुष्यन्तो ममापीदृशस्यैति व्रीडा ।

(इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति)

राजा—(सस्मितम्)

भवतु । दृष्टं ब्रह्मवर्चसम्[a] । सखे, क्वोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि ।

विदूषकः—

णं आसण्णपरिआरिआ[b] चदुरिआ भवदा सन्दिट्ठा-
[ननु आसन्नपरिचारिका चतुरिका भवता सन्दिष्टा-]
'माहवीमण्डवे इमं वेलं अदिवाहइस्सं[c] । तहिं मे
['माधवीमण्डपे इमां वेलाम् अतिवाहयिष्यामि । तत्र मे]
चित्तफलअगदं[d] सहत्थलिहिदं तत्तहोदीए सउन्दलाए
[चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः]
पडिकिदिं[e] आणेहि' त्ति ।
[प्रतिकृतिम् आनय' इति ।

राजा—

ईदृशं हृदयविनोदस्थानम् । तत्तमेव मार्गमादेशय ।

विदूषकः—

इदो इदो भवं ।
[इतः इतः भवान् ।]

(उभौ परिक्रामतः । सानुमत्यनुगच्छति)

विदूषकः—

एसो मणिसिलापट्टअसणाहो[f] माहवीमण्डवो उवहाररमणी-
[एषः मणिशिलापट्टकसनाथः माधवीमण्डपः उपहाररमणी-]
अदाए[g] णिस्संसअं साअदेण विअ णो पडिच्छदि । ता
[यतया निःसंशयं स्वागतेन इव नौ प्रतीच्छति । तत्]
पविसिअ णिसीददु भवं ।
[प्रविश्य निषीदतु भवान् ।]

(उभौ प्रवेशं कृत्वोपविष्टौ)

सानुमती—

लदासंसिदा पेक्खिस्सं दाव सहीए पडिकिदिं । तदो
[लतासंश्रिता प्रेक्षिष्ये तावत् सख्याः प्रतिकृतिम् । ततः]
से भत्तुणो बहुमुहं[h] अणुराअं णिवेदइस्सं ।
[अस्याः भर्तुः बहुमुखम् अनुरागं निवेदयिष्यामि ।]

(इति तथा कृत्वा स्थिता)

राजा—

सखे, सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तम् । कथितवानस्मि भवते च । स भवान्प्रत्यादेशवेलायां मत्समीपमुपगतो

---

a 1-1 glory of a *Brahmana*. This is said ironically

b 1-1 personal attendant

c I shall pass

d 2-1 committed to a picture-tablet

e 2-1 portrait

f 1-1 furnished with marble sl[illegible]

g 3-1 agreeableness of its offerings (of delicious flowers)

h 2-1 manifested in various ways; excessive

नासीत्। पूर्वमपि न त्वया कदाचित् संकीर्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवानसि त्वम्।

विदूषकः—

ण विसुमरामि। किन्तु सव्वं कधिअ अवसाणे उण तुए
[न विस्मरामि। किन्तु सर्वं कथयित्वा अवसाने पुनः त्वया]
परिहासविअप्पो[a] एसो ण भूदत्थो त्ति आचक्खिदं।
[परिहासविजल्पः एषः न भूतार्थः इति आचष्टम्।]
मए वि मिप्पिण्डबुद्धिणा[b] तधा एव्व गहिदं। अधवा
[मया अपि मृत्पिण्डबुद्धिना तथा एव गृहीतम्। अथवा]
भविदव्वदा बलवदी।
[भवितव्यता बलवती।]

सानुमती—

एव्वं णेदं।
[एवं न्वेतत्।]

राजा—(ध्यात्वा)

सखे, त्रायस्व माम्।

विदूषकः—

भो, किं एदं? अणुववण्णं[c] खु ईदिसं तुइ। कदाचि
[भोः, किम् एतत्? अनुपपन्नं खलु ईदृशं त्वयि। कदाचित्]
सप्पुरिसा सोअवत्तव्वा[d] ण होन्ति। णं पवादे वि
[सत्पुरुषाः शोकवर्तव्याः न भवन्ति। ननु प्रवाते अपि]
णिक्कम्पा[e] गिरीओ।
[निष्कम्पाः गिरयः।]

राजा—

वयस्य, निराकरणविक्लवायाः प्रियायाः समवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि

इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं बाष्पप्रकरकलुषामर्पितवती[f]
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम्॥२०३॥

सानुमती—

अम्हहे! ईदिसी सकज्जपरदा[g]। इमस्स सन्दावेण अहं रमामि।
[अहो! ईदृशी स्वकार्यपरता। अस्य सन्तापेन अहं रमे।]

a 1-1 speech uttered in joke

b 3-1 whose intellect is like a lump of clay

c 1-1 unbecoming

d 1-3 subject to grief

e 1-3 immoveable

f 2-1 bedimmed with gushing tears

g 1-1 devotedness to one's own business

विदूषकः—

भो, अत्थि मे तक्को । केण वि तत्तहोदी आआसचारिणा*a*
[भोः, अस्ति मे तर्कः । केन अपि तत्रभवती आकाशचारिणा]
णीद त्ति ।
[नीता इति ।]

a 3-1 celestial being

राजा—

कः पतिदेवतामन्यः*b* परामर्ष्टुमुत्सहेत । मेनका किल सख्यास्ते जन्मप्रतिष्ठेति*c* श्रुतवानस्मि । तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते ।

b 2-1 whose deity is her husband
c 1-1 place of birth

सानुमती—

सम्मोहो क्खु विम्हअणीओ ण पडिबोधो*d* ।
[सम्मोहः खलु विस्मयनीयः न प्रतिबोधः ।]

d 1-1 recollection

विदूषकः—

जइ एव्वं, अत्थि क्खु समाअमो कालेण तत्तहोदीए ।
[यदि एवम्, अस्ति खलु समागमः कालेन तत्रभवत्या ।]

राजा—

कथमिव ?

विदूषकः—

ण क्खु मादापिदरा भत्तुविओअदुक्खिदं*e* दुहिदरं देक्खिदुं
[न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं]
पारेन्ति*f* ।
[पारयतः ।]

e 2-1 pained at separation from her husband
f are able

राजा—

वयस्य [illegible]

स्वप्नो नु माया*g* नु मतिभ्रमो*h* नु
क्लिष्टं नु तावत्फलमेव पुण्यम् ।
असन्निवृत्त्यै तदतीतमेव
मनोरथानामतटप्रपातः ॥१४॥

g 1-1 illusion
h 1-1 mental delusion

विदूषकः—

मा एव्वं । णं अङ्गुलीअअं एव्व णिदंसणं*i* । अवस्स-
[मा एवम् । ननु अङ्गुलीयकम् एव निदर्शनम् । अवश्य-]
म्भाविणो अचिन्तणीओ समाअमो होदि त्ति ।
[म्भाविनः अचिन्तनीयः समागमः भवति इति ।]

i 1-1 proof

राजा—(अङ्गुलीयकं विलोक्य)

अये, इदं तावदसुलभस्थानभ्रंशि*j* शोचनीयम् ।

j 1-1 fallen from a place which it will not easily regain

तव सुचरितमङ्गुलीय नूनं
प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोरमासु^{a} तस्या-
श्च्युतमसि लब्धपदं यदङ्गुलीषु ॥१४५॥

a 7-3 charming on account of rosy nails

सानुमती—

जइ अरणहत्थगदं भवे, सच्चं एव्व सोअणीअं
[यदि अन्यहस्तगतं भवेत्, सत्यम् एव शोचनीयं]
भवे ।
[भवेत् ।]

विदूषकः—

भो, इअं णाम मुद्दा^{b} केण उद्देसेण तत्तहोदीए हत्थसंसग्गं
[भोः, इयं नाम मुद्रा केन उद्देशेन तत्रभवत्याः हस्तसंसर्गं]
पाविदा ?
[प्रापिता ?]

b 1-1 ring

सानुमती—

मम वि कोदूहलेण आआरिदो^{c} एसो ।
[मम अपि कौतूहलेन आकारितः एषः ।]

c 1-1 made to speak

राजा—

श्रूयताम् । यदा स्वनगराय प्रस्थितं मां प्रिया सबाष्पमाह-
'कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यति^{d}' इति ।

d how long will it be ere my lord will make me his queen

विदूषकः—

तदो तदो ?
[ततः ततः ?]

राजा—

पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता ।
एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत्प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ॥१४६॥
तच्च दारुणात्मना^{e} मया मोहान्नानुष्ठितम् ।

e 3-1 cruel

सानुमती—

रमणीओ क्खु अवही विहिणा विसंवादिदो^{f} ।
[रमणीयः खलु अवधिः विधिना विसंवादितः ।]

f 1-1 thwarted

विदूषकः—

कधं धीवलकप्पिदस्स लोहिदमच्छस्स उदलब्भन्तले
[कथं धीवरकल्पितस्य रोहितमत्स्यस्य उदराभ्यन्तरे]
आसि ?
[आसीत् ?]

राजा—

शचीतीर्थे वन्दमानायाः सख्यास्ते हस्ताद्गङ्गास्रोतसि परिभ्रष्टम्।

विदूषकः—

जुज्जइ ।
[युज्यते ।]

सानुमती—

अदो एव्व तवस्सिणीए सउन्दलाए अधम्मभीरुणो इमस्स
[अतः एव तपस्विन्याः शकुन्तलायाः अधर्मभीरोः अस्य]
राएसिणो परिणए सन्देहो आसि । अधवा, ईदिसो
[राजर्षेः परिणये सन्देहः आसीत् । अथवा, ईदृशः]
अणुराओ अहिण्णाणं[a] अवेक्खदि । कधं विअ एदं ।
[अनुरागः अभिज्ञानम् अपेक्षते । कथम् इव एतत् ।]

a 2-1 recognition

राजा—

उपालप्स्ये तावदिदमङ्गुलीयकम्[b]।

b let me now address a few words of reproof to this ring

विदूषकः—(आत्मगतम्)

गहिदो णेण पन्था उम्मत्तआणं[c]।
[गृहीतः अनेन पन्थाः उन्मत्तानाम् ।]

c 6-3 mad

राजा—

कथं नु तं बन्धुरकोमलाङ्गुलिं[d]
करं विहायासि निमग्नमम्भसि ।

d 2-1 having slender and delicate fingers

अथवा,

अचेतनं[e] नाम गुणं न लक्षये-
न्मयैव कस्मादवधीरिता प्रिया ॥ १०७॥

e 1-1 inanimate object

विदूषकः—(आत्मगतम्)

कधं बुभुक्खाए खादिदव्वो म्हि ?
[कथं बुभुक्षया खादितव्यः अस्मि ?]

राजा—

अकारणपरित्यक्ते, अनुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः
पुनर्दर्शनेन ।

(प्रविश्य पटाक्षेपेण चित्रफलकहस्ता)

चतुरिका—

इअं चित्तगदा[a] भट्टिणी ।
[इयं चित्रगता भर्त्री ।]

(इति चित्रफलकं दर्शयति)

विदूषकः—

साहु वअस्स । महुरावत्थाणदंसणीओ भावाणुप्पवेसो[b] ।
[साधु वयस्य । मधुरावस्थानदर्शनीयः भावानुप्रवेशः ।]
खलदि विअ मे दिट्ठी णिण्णुण्णदप्पदेसेसु ।
[स्खलति इव मे दृष्टिः निम्नोन्नतप्रदेशेषु ।]

सानुमती—

अम्मो एसा राएसिणो णिउणदा । जाणे, सही अग्गदो मे
[अहो एषा राजर्षेः निपुणता । जाने, सखी अग्रतः मे]
वट्टदि त्ति ।
[वर्तते इति ।]

राजा—

यद्यत्साधु न चित्रे स्यात्क्रियते तत्तदन्यथा ।
तथापि तस्या लावण्यं रेखया[c] किञ्चिदन्वितम् ॥ १४८ ॥

सानुमती—

सरिसं एव्वं पच्छादावगुरुणो सिणेहस्स अणवलेवस्स अ ।
[सदृशम् एवं पश्चात्तापगुरोः स्नेहस्य अनवलेपस्य च ।]

विदूषकः—

भो, दाणिं तिण्णि तत्तहोदीओ दीसन्ति । सव्वाओ[d] अ
[भोः इदानीं तिस्रः तत्रभवत्यः दृश्यन्ते । सर्वाः च]
दंसणीआओ । कदमा एत्थ तत्तहोदी सउन्दला ?
[दर्शनीयाः । कतमा अत्र तत्रभवती शकुन्तला ?]

सानुमती —

अणभिण्णो क्खु ईदिसस्स रूवस्स मोहदिट्ठी[e] अअं जणो ।
[अनभिज्ञः खलु ईदृशस्य रूपस्य मोघदृष्टिः अयं जनः ।]

राजा—

त्वं तावत्कतमां तर्कयसि ?

विदूषकः—

तक्केमि, जा एसा सिढिलकेसबन्धणुव्वन्तकुसुमेण[f] केसन्तेण
[तर्कयामि, या एषा शिथिलकेशबन्धनोद्वान्तकुसुमेन केशान्तेन]

---

a 1·1 committed to portrait

b 1·1 delineation of sentiment

c 3-1 sketch; drawing

d 1-3 all

e 1-1 dull-sighted

f 3-1 with flowers falling down through the slackened hair-band

उब्भिरणस्सेअबिन्दुणा वअणेण विसेसदो ओसरिदेहिं[a]
[उद्भिन्नस्वेदबिन्दुना वदनेन विशेषतः अपसृताभ्यां]
बाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स[b] चूदपादवस्स पासे
[बाहुभ्याम् अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे]
ईसिपरिस्सन्ता[c] विअ आलिहिदा, एसा सउन्दला। इदराओ
[ईषत्परिश्रान्ता इव आलिखिता, एषा शकुन्तला। इतरे,]
सहीओ त्ति।
[सख्यौ इति।]

राजा—

निपुणो भवान्। अस्त्यत्र मे भावचिह्नम्[d]।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोलपतितं दृश्यमिदं वर्णिकोच्छ्वासात्[e] ॥१४९॥

चतुरिके, अर्धलिखितमेतद् विनोदस्थानम्। तस्माद्गच्छ, वर्तिकां[f] तावदानय।

चतुरिका—

अज्ज माठव्व, अवलम्ब चित्तफलअं। जाव आअच्छामि।
[आर्य माठव्य, अवलम्बस्व चित्रफलकम्। यावद् आगच्छामि।]

राजा—

अहमेवैतदवलम्बे।

(इति यथोक्तं करोति)
(निष्क्रान्ता चेटी)

राजा—

अहं हि

साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहुमन्यमानः[g]।
स्रोतोवहां पथि निकामजलामतीत्य[h]
जातः सखे प्रणयवान् मृगतृष्णिकायाम्[i] ॥ १५० ॥

विदूषकः—(आत्मगतम्)

एसो अत्तभवं णदिं अदिक्कमिअ मिअतिण्हआए सङ्कन्तो।
[एषः अत्रभवान् नदीम् अतिक्रम्य मृगतृष्णया संक्रान्तः।]
(प्रकाशम्) भो, अवरं किं एत्थ लिहिदव्वं।
भोः, अपरं किम् अत्र लिखितव्यम्।]

सानुमती—

जो जो पदेसो सहीए मे अहिरूवो, तं तं आलिहिदुकामो
[यः यः प्रदेशः सख्याः मे अभिरूपः, तं तम् आलिखितुकामः]
भवे।
[भवेत्।]

a 3-2 gracefully extended
b 6-1 with its tender shoots glistening with the water (she has poured upon them)
c 1-1 a little tired
d 1-1 proof of my passion
e 5-1 rising up of the pigment
f 2-1 brush
g 1-1 making much
h 2-1 having plenty of water
i 7-1 mirage

राजा—

श्रूयताम्।

कार्या सैकतलीनहंसमिथुनाa स्रोतोवहा मालिनी
पादास्तामभितोb निषण्णहरिणा गौरीगुरोःc पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
श‍ृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानांd मृगीम्॥ १५१॥

विदूषकः—(आत्मगतम्)

जधा अहं पेक्खामि, पूरिदव्वं ऐण चित्तफलअं
[यथा अहं प्रेक्षे, पूरयितव्यम् अनेन चित्रफलकं]
लम्बकुच्चाणंe तावसाणं कदम्बेहिंf।
[लम्बकूर्चानां तापसानां कदम्बैः।]

राजा—

वयस्य, अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतमत्रg विस्मृतमस्माभिः।

विदूषकः—

किं विअ।
[किम् इव।]

सानुमती—

वणवासस्स सोउमारस्सh अ जं सरिसं भविस्सदि।
[वनवासस्य सौकुमारस्य च यत् सदृशं भविष्यति।]

राजा—

कृतं न कर्णार्पितबन्धनंi सखे
शिरीषमागण्डविलम्बिकेशरम्।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रंj रचितं स्तनान्तरे॥ १५२॥

विदूषकः—

भो, किं णु तत्तभोदी रत्तकुवलअपल्लवसोहिणाk अग्गहत्थेण
[भोः, कि नु तत्रभवती रक्तकुवलयपल्लवशोभिना अग्रहस्तेन]
मुहं आवरिअ चइदचइदा विअ ठिदा।
[मुखम् आवार्य चकितचकिता इव स्थिता।]
(सावधानं निरूप्य। दृष्ट्वा)
आ, एसो दासीएपुत्तोl कुसुमरसपाडच्चरो तत्थभोदीए
[आः, एषः दास्याःपुत्रः कुसुमरसपाटच्चरः तत्रभवत्याः]
वअणं अहिलङ्घदि महुअरो।
[वदनम् अभिलङ्घति मधुकरः।]

a 1-1 with a pair of swans resting on its sandbanks
b 1-3 hill
c 6-3 *Himalaya* lit. father of *Parvati*
d 2-1 rubbing
e 6-3 having long beards
f 3-3 multitude
g 1-1 ornament
h 6-1 tenderness
i 1-1 with its stalk fastened on (her) ear
j 1-1 necklace of lotus fibres
k 3-3 beautiful like the tender petal of a red lotus
l 1-1 bastardly

राजा—

ननु वार्यतामेष धृष्टः[a]।

विदूषकः—

भवं एव्व अविणीदाणं सासिदा[b] इमस्स वारणे[c] पहविस्सदि।
[भवान् एव अविनीतानां शासिता अस्य वारणे प्रभविष्यति।]

राजा—

युज्यते। अयि भोः कुसुमलताप्रियातिथे, किमत्र परिपतनखेदमनुभवसि[d]?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति॥१५३॥

सानुमती—

अज्ज, अभिजादं[e] क्खु एसो वारिदो।
[आर्य, अभिजातं खलु एषः वारितः।]

विदूषकः—

पडिसिद्धा[f] वि वामा[g] एसा जादी।
[प्रतिषिद्धा अपि वामा एषा जातिः।]

राजा—

एवं भो न मे शासने तिष्ठसि। श्रूयतां तर्हि सम्प्रति।

अक्लिष्टबालतरुपल्लवलोभनीयं[h]
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं[i] स्पृशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम्[j]॥१५४॥

विदूषकः—

एव्वंतिक्खदण्डस्स[k] किं ण भाइस्सदि? (प्रहस्य। आत्मगतम्)
[एवंतीक्ष्णदण्डस्य किं न भेष्यति?]
एसो दाव उम्मत्तो। अहं पि एदस्स सङ्गेण ईदिसवअणो
[एषः तावद् उन्मत्तः। अहम् अपि एतस्य सङ्गेन ईदृशवचनः]
विअ संवुत्तो। (प्रकाशम्) भो, चित्तं क्खु एदं।
[इव संवृत्तः। भोः, चित्रं खलु एतत्।]

राजा—

कथं चित्रम्?

a 1-1 impertinent

b 1-1 chastiser
c 7-1 removal; driving away

d Why do you take the trouble of hovering round about her?

e politely

f 1-1 driven off
g 1-1 perverse

h 1-1 as charming as an uninjured blossom of a young tree
i 2-1 *Bimba*-like lip
j 2-1 imprisoned in the hollow of a lotus

k 6-1 inflicting so severe a punishment

सानुमती—

अहं वि दाणिं अणवगदत्था*a* । किं उण जधालि
[अहम् अपि इदानीम् अनवगतार्था । किं पुनर् यथालि-]
हिदाणुभावी*b* एसो ।
[खितानुभावी एषः ।]

राजा—

वयस्य, किमिदमनुष्ठितं पौरोभाग्यम्*c* ?
दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता*d* कान्ता ॥१५५॥
(इति वाष्पं विहरति)

सानुमती—

पुव्वावरविरोही*e* अपुव्वो एसो विरहमग्गो ।
[पूर्वापरविरोधी अपूर्वः एषः विरहमार्गः ।]

राजा—

वयस्य, कथमेवमविश्रान्तदुःखमनुभवामि ।
प्रजागरात् खिलीभूतस्तस्याः*f* स्वप्ने समागमः ।
वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥१५६॥

सानुमती—

सव्वधा पमज्जिदं*g* तुए पच्चादेसदुक्खं सउन्दलाए ।
[सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः ।]

चतुरिका—(प्रविश्य)

जेदु जेदु भट्टा । वट्टिआकरण्डअं*h* गेण्हिअ इदोमुहं
[जयतु जयतु भर्ता । वर्तिकाकरण्डकं गृहीत्वा इतोमुखं]
पत्थिद म्हि ।
[प्रस्थिता अस्मि ।]

राजा—

किं च ।

चतुरिका—

सो मे हत्थादो अन्तरा*i* तरलिआदुदिआए देवीए वसुमदीए
[सः मे हस्तात् अन्तरा तरलिकाद्वितीयया देव्या वसुमत्या]
अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं*j*
[अहम् एव आर्यपुत्रस्य उपनेष्यामि इति सबलात्कारं]
गहिदो ।
[गृहीतः ।]

a 1-1 not knowing the fact
b 1-1 actually perceiving as it is painted
c 1-1 wicked act
d 1-1 transformed into a picture
e 1-1 inconsistent with what preceded and what followed
f 1-1 rendered vain
g 1-1 lit. wiped out; atoned for
h 2-1 box containing brushes (and paints)
i on the way
j forcibly

विदूषकः—

दिट्ठिआ तुमं मुक्का ।
[दिष्ट्या त्वं मुक्ता ।]

चतुरिका—

जाव देवीए विडवलग्गं उत्तरीअं तरलिआ मोचेदि,
[यावद् देव्याः विटपलग्नम् उत्तरीयं तरलिका मोचयति,]
ताव मए णिव्वाहिदो अत्ता[a] ।
[तावद् मया निर्वाहितः आत्मा ।] निर्वासित इति काट० पठति।

राजा—

वयस्य, उपस्थिता देवी बहुमानगर्विता[b] च । भवानिमां प्रतिकृतिं रक्षतु । आच्छादयतु ।

विदूषकः—

अत्ताणं त्ति भणाहि । (चित्रफलकमादायोत्थाय च) जइ
[आत्मानम् इति भण । यदि]
भवं अन्तेउरकालकूडादो[c] मुच्चीअदि, तदो मं मेहप्प-
[भवान् अन्तःपुरकालकूटात् मुच्यते, ततः मां मेघप्र-]
डिच्छन्दे पासादे सद्दावेहि । K. reads कलहात्.
[तिच्छन्दे प्रासादे शब्दय ।]

(इति द्रुतपदं निष्क्रान्तः)

सानुमती—

अण्णसङ्कन्तहिअओ[d] वि पढमसम्भावणं अवेक्खदि ।
[अन्यसङ्क्रान्तहृदयः अपि प्रथमसंभावनाम् अपेक्षते ।]
अदिसिढिलसोहदो[e] दाणिं एसो ।
[अतिशिथिलसौहृदः इदानीम् एषः ।]

प्रतीहारी—(प्रविश्य पत्रहस्ता)

जेदु जेदु देवो ।
[जयतु जयतु देवः ।]

राजा—

वेत्रवति, न खल्वन्तरा दृष्टा त्वया देवी ?

प्रतीहारी—

अध इं । पत्तहत्थं मं पेक्खिअ पडिणिउत्ता[f] ।
[अथ किम् । पत्रहस्तां मां प्रेक्ष्य प्रतिनिवृत्ता ।]

राजा—

कार्यज्ञा कार्योपरोधं[g] मे परिहरति ।

[a] I took myself off. Lit. By me my own person was carried off.

[b] 1-1 made insolent by too much honour paid (to her) by my great attention to her.

[c] 5-1 poisonous influence of the harem

[d] 1-1 with heart transferred to another

[e] 1-1 whose affection is very weak

[f] 1-1 turned back

[g] 2-1 impediment in state-affairs

प्रतीहारी—

देव, अमच्चो विण्णवेदि, 'अत्थजादस्स[a] गणणाबहुलदाए
[देव, अमात्यः विज्ञापयति, 'अर्थजातस्य गणनाबहुलतया]
एक्कं एव्व पोरकज्जं अवेक्खिदं[b]। तं देवो पत्तारूढं
[एकम् एव पौरकार्यम् अपेक्षितम्। तद् देवः पत्रारूढं]
पच्चक्खीकरेदु[c]' त्ति।
[प्रत्यक्षीकरोतु' इति।]

राजा—

इतः पत्रिकां दर्शय।

(प्रतीहार्युपनयति)

राजा—(अनुवाच्य)

कथम्। समुद्रव्यवहारी[d] सार्थवाहो[e] धनमित्रो नाम नौव्यसने[f] विपन्नः। अनपत्यश्च किल तपस्वी[g]। राजगामी तस्यार्थसञ्चय इत्येतदमात्येन लिखितम्। कष्टं खल्वनपत्यता। बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम्। विचार्यताम्। यदि काचिदापन्नसत्त्वा[h] तस्य भार्यासु स्यात्।

प्रतीहारी—

देव, दाणिं जेव्व साकेदअस्स सेट्ठिणो दुहिदा णिव्वुत्त-
[देव, इदानीम् एव साकेतकस्य श्रेष्ठिनः दुहिता निर्वृत्त-]
पुंसवणा[i] जाआ से सुणीअदि।
[पुंसवना जाया अस्य श्रूयते।]

राजा—

ननु गर्भः पित्र्यं रिक्थमर्हति[j]। गच्छ। एवममात्यं ब्रूहि।

प्रतीहारी—

जं देवो आणवेदि।
[यद् देवः आज्ञापयति।]

(इति प्रस्थिता)

राजा—

एहि तावत्।

प्रतीहारी—

इअं म्हि।
[इयम् अस्मि।]

राजा—

किमनेन सन्ततिरस्ति नास्तीति।

[a] 6-1 revenue
[b] 1-1 attended
[c] (the lord) may notice
[d] 1-1 trading by sea
[e] 1-1 merchant
[f] 7-1 shipwreck
[g] 1-1 poor fellow
[h] 1-1 big with child
[i] 1-1 having *Pumsavana* ceremony just completed. *Pumsavana* is one of the sixteen rites of the *Hindus*
[j] the child in the womb must inherit its father's property.

सर्वज्ञाद्योपहतात् पितेवाज्जरद्दीयात् — इति स्मृतिः।

येन येन वियुज्यन्ते[a] प्रजाः स्निग्धेन[b] बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्[c] ॥१५७॥

प्रतीहारी—

एव्वं णाम घोसइदव्वं । (निष्क्रम्य, पुनः प्रविश्य) काले पवुट्ठं
[एवं नाम घोषयितव्यम् । काले प्रवृष्टम्]
विअ[d] अहिणन्दिदं[e] देवस्स सासणं ।
[इव अभिनन्दितं देवस्य शासनम् ।]

राजा—(दीर्घमुष्णं च निःश्वस्य)

एवं भोः सन्ततिच्छेदनिरवलम्बानां[f] कुलानां मूलपुरुषावसाने[g] सम्पदः परमुपतिष्ठन्ति । ममाप्यन्ते पुरुवंशश्रिय एष एव वृत्तान्तः ।

प्रतीहारी—

पडिहदं अमङ्गलम्[h] ।
[प्रतिहतम् अमङ्गलम् ।]

राजा— सगर्भशकुन्तलास्मरणम्

धिङ्मामुपस्थितश्रेयोऽवमानिनम्[i] ।

सानुमती—

असंसअं सहिं जेव्व हिअए कदुअ णिन्दिदो णेण
[असंशयं सखीम् एव हृदये कृत्वा निन्दितः अनेन]
अप्पा ।
[आत्मा ।]

पुत्रगर्भ उत्पादिते पि राजा—

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा ।
कल्पिष्यमाणा महते फलाय[j]
वसुन्धरा काल इवोप्तबीजा ॥ १५८ ॥

cp. आत्मा वै जायते पुत्रः।

सानुमती—

अपरिच्छिण्णा[k] दाणिं दे सन्ददी भविस्सदि ।
[अपरिच्छिन्ना इदानीं ते सन्ततिः भविष्यति ।]

चतुरिका—(जनान्तिकम्)

अए, इमिणा सत्थवाहवुत्तन्तेण दिउणुव्वेओ[l] भट्टा । णं
[अये, अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्ता । एनम्]
अस्सासिदुं मेहप्पडिच्छन्दादो अज्जं माढव्वं गेण्हिअ
[आश्वासयितुं मेघप्रतिच्छन्दात् आर्यं माढव्यं गृहीत्वा]
आअच्छ ।
[आगच्छ ।]

---

a are separated
b loving
c be it proclaimed
प्रहृष्टवर्षणम्
d like the timely shower of rain
e 1-1 hailed
f 6-3 supportless by the failure of issue
g at the demise of the head of the family
h may the evils be averted
i Fie on me who rejected the good when it presented itself to me.
j promising a plentiful harvest
k 1-1 unbroken
l 1-1 whose grief is doubbled

प्रतीहारी—

सुट्ठु भणासि ।
[सुष्ठु भणसि ।]

(इति निष्क्रान्ता)

राजा—

अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः[a] । कुतः,

अस्मात्परं बत यथाश्रुति सम्भृतानि[b]
को नः कुले निवपनानि[c] नियच्छतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति ॥२५॥

(इति मोहमुपागतः)

चतुरिका—(ससंभ्रममवलोक्य)

समस्ससदु समस्ससदु भट्टा ।
[समाश्वसितु समाश्वसितु भर्ता ।]

सानुमती—

हद्धी हद्धी । सदि क्खु दीवे ववधाणदोसेण[d] एसो
[हाधिक् हाधिक् । सति खलु दीपे व्यवधानदोषेण एषः]
अन्धआरदोसं अणुहोदि । अहं दाणिं जेव्व णिव्वुदं
[अन्धकारदोषम् अनुभवति । अहम् इदानीम् एव निर्वृतं]
करेमि । अधवा सुदं मए सउन्दलं समस्सासअन्तीए
[करोमि । अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्याः]
महेन्दजणणीए मुहादो । जण्णभाओसुआ[e] देवा जेव्व तधा
[महेन्द्रजनन्याः मुखात् । यज्ञभागोत्सुकाः देवाः एव तथा]
अणुचिट्ठिस्सन्ति जधा अइरेण धम्मपदिणिं भट्टा अहिण-
[अनुष्ठास्यन्ति यथा अचिरेण धर्मपत्नीं भर्ता अभिन-]
न्दिस्सदि त्ति । ता जुत्तं एदं कालं पडिवालेदुं ।
[न्दिष्यति इति । तस्माद् युक्तम् एतं कालं प्रतिपालयितुम् ।]
जाव इमिणा वुत्तन्तेण पिअसहिं समस्सासेमि ।
[यावद् अनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि ।]

(इत्युद्भ्रान्तकेन निष्क्रान्ता)

नेपथ्ये—

अब्बम्हण्णं अब्बम्हण्णं* ।
[अब्रह्मण्यम् अब्रह्मण्यम् ।]

a 1-3 ancestor; lit. partaker of oblation to the dead
b 2-3 prepared according to the *Vedic* rite
c 2-3 obsequial offering
d 3-1 fault of the screen
e 1-3 eager for their portions of the sacrifice
* see notes

राजा—(प्रत्यागतप्राणः । कर्णं दत्त्वा)

अये माठव्यस्येवार्तस्वरः । कः कोऽत्र भोः ?

प्रतीहारी—(प्रविश्य)

परित्ताअदु देवो संसअगदं*a* वअस्सं ।
[परित्रायतां देवः संशयगतं वयस्यम् ।]

राजा—

केनात्तगन्धो माणवकः*b* ?

प्रतीहारी—

अदिट्ठरूवेण*c* केण वि सत्तेण अदिक्कमिअ*d* मेहपडिच्छन्दस्स
[अदृष्टरूपेण केन अपि सत्त्वेन अतिक्रम्य मेघप्रतिच्छन्दस्य]
पासादस्स अग्गभूमिं*e* आरोविदो ।
[प्रासादस्य अग्रभूमिम् आरोपितः ।]

राजा—(उत्थाय)

मा तावत् । ममापि सत्त्वैरभिभूयन्ते गृहाः । अथवा,

अहन्यहन्यात्मन एव ताव-
ज्ज्ञातुं प्रमादस्खलितं*f* न शक्यम् ।
प्रजासु कः केन पथा प्रयाती-
त्यशेषतो वेदितुमस्ति शक्तिः ॥१६०॥

नेपथ्ये—

भो वअस्स, अविहा*g* अविहा ।
[भोः वयस्य, अविधा अविधा ।]

राजा—(गतिभेदेन परिक्रामन्)

सखे, न भेतव्यं न भेतव्यम् ।

नेपथ्ये—(पुनस्तदेव पठित्वा)

कधं ण भाइस्सं । एसो मं को वि पच्चावणदसिरोहरं
[कथं न भेष्यामि । एषः मां कः अपि पश्चादवनतशिरोधरम्]
इक्खुं*h* विअ तिक्खभङ्गं करेदि ।
[इक्षुम् इव तीक्ष्णभङ्गं करोति ।]

राजा—(सदृष्टिक्षेपम्)

धनुस्तावत् ।

यवनी—(प्रविश्य शार्ङ्गहस्ता)

भट्टा, एदं हत्थावावसहिदं*i* सरासणं ।
[भर्तः, एतद् हस्तावापसहितं शरासनम् ।]

(राजा सशरं धनुरादत्ते)

a 2-1 fallen into danger

b 1-1 Who has done violence to *Manavaka*? See notes also

c 3-1 invisible form

d having seized

e 2-1 pinnacle

f 1-1 wrong step taken by carelessness

g this interjection is used in calling for help

h 2-1 sugar-cane

i glove; protector of hand

नेपथ्ये—

एष त्वामभिनवकण्ठशोणितार्थी*a*

शार्दूलः*b* पशुमिव हन्मि चेष्टमानम् ।

आर्तानां भयमपनेतुमात्तधन्वा

दुष्यन्तस्तव शरणं*c* भवत्विदानीम् ॥१६१॥

राजा—(सरोषम्)

कथं मामेवोद्दिशति*d* । तिष्ठ कुणपाशन*e* । त्वमिदानीं न भविष्यसि । (शार्ङ्गमारोप्य) वेत्रवति, सोपानमार्गमादेशय ।

प्रतीहारी—

इदो इदो देवो ।

[इतः इतः देवः ।]

(सर्वे सत्वरमुपसर्पन्ति)

राजा—(समन्ताद्विलोक्य)

शून्यं खल्विदम् ।

नेपथ्ये—

अविहा अविहा । अहं अत्तभवन्तं पेक्खामि । तुमं मं

[अविधा अविधा । अहम् अत्रभवन्तं प्रेक्षे । त्वं मां]

ण पेक्खसि । विडालग्गहिदो*f* मूसओ विअ णिरासो

[न प्रेक्षसे । विडालगृहीतः मूषकः इव निराशः]

म्हि जीविदे संवुत्तो ।

[अस्मि जीविते संवृत्तः ।]

राजा—

भोस्तिरस्करिणीगर्वित*g*, मदीयमस्त्रं त्वां द्रक्ष्यति । एष तमिषुं सन्दधे ।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।

हंसो हि क्षीरमादत्ते* तन्मिश्रा वर्जयत्यपः ॥१६२॥

(इत्यस्त्रं सन्धत्ते)

(ततः प्रविशति विदूषकमुत्सृज्य मातलिः)

मातलिः*h*—

कृताः शरव्यं*i* हरिणा*j* तवासुराः

शरासनं तेषु विकृष्यतामिदम् ।

प्रसादसौम्यानि*k* सतां सुहृज्जने

पतन्ति चक्षूंषि न दारुणाः शराः ॥१६३॥

राजा—(अस्त्रमुपसंहरन्)

अये, मातलिः । स्वागतं महेन्द्रसारथे ।

a 1-1 thirsting for the fresh throat-blood
b 1-1 tiger
c 1-1 refuge
d alludes
e 8-1 flesh-eater
f 1-1 seized by a cat
g 8-1 proud of thy art of rendering thyself invisible
* see notes
h 1-1 *Indra's* charioteer
i mark
j 3-1 *Indra*
k 1-3 softened with kindness

विदूषकः—(प्रविश्य)

अहं जेण इट्ठिपसुमारं मारिदो*a*, सो इमिणा साअदेण [अहं येन इष्टिपशुमारं मारितः, सः अनेन स्वागतेन] अहिणन्दीअदि*b*। [अभिनन्द्यते।]

a slaughtered like a victim at a sacrifice

b is greeted

मातलिः—(सस्मितम्)

आयुष्मन्, श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः।

राजा—

अवहितोऽस्मि*c*।

c I am attentive

मातलिः—

अस्ति कालनेमिप्रसूतिर्दुर्जयो*d* नाम दानवगणः।

d 1-1 descendant of *Kalanemi*, see notes also

राजा—

अस्ति। श्रुतपूर्वं मया नारदात्*।

* see notes

मातलिः—

सख्युस्ते स किल शतक्रतोरजय्य*e*-

स्तस्य त्वं रणशिरसि स्मृतो निहन्ता।

उच्छेत्तुं प्रभवति यन्न सप्तसप्ति*f*-

स्तन्नैशं*g* तिमिरमपाकरोति चन्द्रः ॥१६४॥

e 6-1 lord of a hundred sacrifices ; *Indra*

f 1-1 drawn by seven steeds; the sun

g 2-1 nocturnal

स भवानात्तशस्त्र एवमिदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्।

राजा—

अनुगृहीतोऽहमनया मघवतः*h* सम्भावनया*i*। अथ माठव्यं प्रति भवता किमेवं प्रयुक्तम्?

h 6-1 *Indra*

i 3-1 honour

मातलिः—

तदपि कथ्यते। किंचिन्निमित्तादपि मनःसन्तापादायुष्मान्मया विक्लवो*j* दृष्टः। पश्चात्कोपयितुमायुष्मन्तं तथा कृतवानस्मि। कुतः,

ज्वलति चलितेन्धनोऽग्नि*k*-

र्विप्रकृतः*l* पन्नगः फणां कुरुते।

प्रायः स्वं महिमानं

क्षोभात्प्रतिपद्यते हि जनः ॥१६५॥

j 1-1 depressed

k 1-1 having its fuel stirred up

l 1-1 irritated

राजा—(जनान्तिकम्)

वयस्य, अनतिक्रमणीया दिवस्पतेराज्ञा*m*। तदत्र परिगतार्थं कृत्वा*n* मद्वचनादमात्यपिशुनं ब्रूहि।

m order of *Indra*

n having made him acquainted with the circumstance

स्वन्मतिः केवला तावत्परिपालयितुं प्रजाः ।
अधिज्यमिदमन्यास्मिन्कर्मणि व्यापृतं[a] धनुः ॥१६६॥

इति ।

विदूषकः—

जं भवं आणवेदि ।
[यद् भवान् आज्ञापयति ।]

(इति निष्क्रान्तः)

मातलिः—

आयुष्मान् रथमारोहतु ।

(राजा रथारोहणं नाटयति)

(इति निष्क्रान्ताः सर्वे)

॥ इति षष्ठोऽङ्कः ॥

॥ अथ सप्तमोऽङ्कः ॥

(ततः प्रविशत्याकाशयानेन रथारूढो राजा मातलिश्च)

राजा—

मातले, अनुष्ठितनिदेशोऽपि[b] मघवतः सत्क्रियाविशेषादनुपयुक्त[c]मिवात्मानं समर्थये ।

मातलिः—(सस्मितम्)

आयुष्मन्, उभयमप्यपरितोषं[d] समर्थये ।

प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानतोषितो[e] भवतः सोऽपि न सत्क्रियागुणान् ॥१६७॥

राजा—

मातले, मा मैवम् । स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य[f]

अन्तर्गतप्रार्थनमन्तिकस्थं[g]
जयन्तमुद्वीक्ष्य[h] कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा ॥१६८॥*

मातलिः—

किमिव नामायुष्मानमरेश्वराान्नार्हति । पश्य ।

सुरसखस्य हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः
पुरुषकेसरिणश्च* पुरा नखैः ॥१६९॥

a 1-1 employed

b although I have executed (Indra's) mission

c 5-1 extraordinary reception

d 3-1 honour

e 1-1 filled with joy at your heroic deed

f to offer half of one's seat is the highest honour that can be bestowed upon a person

g 2-1 inwardly longing

h 2-1 Indra's son

*see notes

राजा—

अत्र खलु शतक्रतोरेव महिमा*a* स्तुत्यः ।

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः

संभावनागुणमवेहि*b* तमीश्वराणाम् ।

किं वाभविष्यदरुणस्तमसां*c* विभेत्ता

तं चेत्सहस्रकिरणो*d* धुरि नाकरिष्यत् ॥ १७० ॥

मातलिः—

सदृशमेवैतत् । (स्तोकमन्तरमतीत्य) आयुष्मन्, इतः पश्य नाकपृष्ठगतस्य*e* सौभाग्यमात्मयशसः ।

विच्छित्तिशेषैः*f* सुरसुन्दरीणां

वर्णैरमी कल्पलतांशुकेषु ।

संचिन्त्य गीतिक्षममर्थबन्धं*g*

दिवौकसस्त्वच्चरितं लिखन्ति ॥ १७१ ॥

राजा—

मातले, असुरसंप्रहारोत्सुकेन*h* पूर्वेद्युर्दिवमधिरोहता न लक्षितः स्वर्गमार्गः । कतरस्मिन् मरुतां पथि*i* वर्तामहे ।

मातलिः—

त्रिस्रोतसं*j* वहति यो गगनप्रतिष्ठां

ज्योतींषि वर्तयति च प्रविभक्तरश्मिः ।

तस्य द्वितीयहरिविक्रमनिस्तमस्कं*k*

वायोरिमं परिवहस्य वदन्ति मार्गम् ॥ १७२ ॥

राजा—

मातले, अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा प्रसीदति । (रथाङ्गमवलोक्य) मेघपदवीमवतीर्णौ*l* स्वः ।

मातलिः—

कथमवगम्यते ?

राजा—

अयमरविवरेभ्यश्चातकैर्निष्पतद्भि*m*-

र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।

गतमुपरि घनानां वारिगर्भोदराणां

पिशुनयति रथस्ते शीकरक्लिन्ननेमिः*n* ॥ १७३ ॥

मातलिः—

इयादायुष्मान् स्वाधिकारभूमौ वर्तिष्यते ।

---

a 1-1 greatness
b honour
c 1-1 dawn
d 1-1 sun
e 6-1 having reached the surface of heaven
f 3-3 residue of paints
g verse suitable for singing
h 3-1 eager to fight with demons
i in what region of the winds
j 2-1 three-coursed river *i. e., Ganges*
k 2-1 free from darkness on account of the second stride of *Vishnu* : see notes also
l 2-1 path of the clouds
m 3-3 interstices of the spokes
n 1-1 with wheels bedewed with moisture

राजा—(अधोऽवलोक्य)

वेगावतरणादाश्चर्यदर्शनः[a] संलक्ष्यते मनुष्यलोकः । तथा हि

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां[b] विजहति स्कन्धोदयात्पादपाः ।
सन्तानात्तनुभावनष्टसलिला व्यक्तिं[c] भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ॥१७४॥

मातलिः—

साधु दृष्टम् । (सबहुमानं विलोक्य) अहो उदाररमणीया[d] पृथिवी ।

राजा—

मातले, कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिस्यन्दी[e] सान्ध्य इव मेघपरिघः सानुमानालोक्यते ।

मातलिः—

आयुष्मन्, एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपःसंसिद्धिक्षेत्रम्[f] । पश्य

स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥१७५॥

राजा—

तन्न अनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य[g] भगवन्तं गन्तुमिच्छामि ।

मातलिः—

प्रथमः कल्पः[h] ।

(नाट्येनावतीर्णौ)

राजा—(सविस्मयम्)

उपोढशब्दा[i] न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः ।
अभूतलस्पर्शतयानिरुद्धत-
स्तवावतीर्णोऽपि रथो न लक्ष्यते ॥१७६॥

मातलिः—

एतावानेव शतक्रतोरायुष्मतश्च विशेषः[j] ।

राजा—

मातले, कतमस्मिन् प्रदेशे मारीचाश्रमः ?

मातलिः—(हस्तेन दर्शयन्)

वल्मीकार्धनिमग्नमूर्तिरुरसा[k] सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः ।

a 1-1 presenting a wonderful sight
b 2-1 state of their being enveloped in the foliage
c 2-1 magnitude ; distinctness
d 1-1 majestic and charming
e 1-1 emitting golden fluid
f a class of gods
g having circumambulated
h an excellent idea
i 1-3 causing no sound
j 1-1 distinction
k 1-1 with his body half buried in an ant-hill

अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥१७७

राजा—

नमस्ते कष्टतपसे[a]।

मातलिः—(संयतप्रग्रहं रथं कृत्वा)

महाराज, एतावदितिपरिवर्धितमन्दारवृक्षं[b], प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा—

स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि[c]।

मातलिः—(रथं स्थापयित्वा)

अवतरत्वायुष्मान्।

राजा—(अवतीर्य)

मातले, भवान्कथमिदानीम्।

मातलिः—

संयन्त्रितो मया रथः। वयमप्यवतरामः। (तथा कृत्वा) इत आयुष्मन्। (परिक्रम्य) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

राजा—

ननु विस्मयादवलोकयामि।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे[d] वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥१७८

मातलिः—

उत्सर्पिणी[e] खलु महतां प्रार्थना। (परिक्रम्य। आकाशे) अये वृद्धशाकल्य, किमनुतिष्ठति भगवान्मारीचः। किं ब्रवीषि— 'दाक्षायण्या[f] पतिव्रताधर्ममधिकृत्य पृष्टस्तत्तस्यै महर्षिपत्नीसहितायै कथयति' इति।

राजा—(कर्णं दत्त्वा)

अये, प्रतिपाल्यावसराः खलु मुनयः।

मातलिः—(राजानमवलोक्य)

अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्। यावस्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि।

राजा—

यथा भवान्मन्यते।

(इति स्थितः)

a 4-1 practising hard penance

b 2-1 having *Mandara* trees reared by *Aditi*

c 2-1 pool of nectar

d 7-1 abounding in desire-yielding trees

e 1-1 high-soaring

f 1-1 *Daksha's* daughter

मातलिः—

आयुष्मन्, साधयाम्यहम् ।

(इति निष्क्रान्तः)

राजा—(निमित्तं सूचयित्वा)

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा ।
पूर्वावधीरितं*a* श्रेयो दुःखं हि परिवर्तते ॥१७९॥

नेपथ्ये—

मा क्खु चावलं करेहि । कधं गदो जेव्व अत्तणो
[मा खलु चापलं कुरु । कथं गतः एव आत्मनः]
पकिदिं ।
[प्रकृतिम् ।]

राजा—(कर्णं दत्त्वा)

अभूमिरियमविनयस्य । को नु खल्वेष निषिध्यते ? (शब्दानुसारेणावलोक्य । सस्मितम्) अये, को नु खल्वयमनुबध्यमानस्तपस्विनीभ्यामबालसत्त्वो*b* बालः ।

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेशरम्*c* ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥१८०॥

(ततः प्रविशति यथ निर्दिष्टकर्मा तपस्विनीभ्यां बालः)

बालः—

जिम्भ सिङ्घ । दन्ताइं दे गणइस्सं ।
[जृम्भस्व सिंह । दन्तान् ते गणयिष्यामि ।]

प्रथमा—

अविणीद, किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्प-
[अविनीत, किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्र-]
अरेसि*d* । हन्त वड्ढदि दे संरम्भो । ठाणे क्खु इसि-
[करोषि । हन्त वर्धते ते संरम्भः । स्थाने खलु ऋषि-]
जणेण सव्वदमणो त्ति किदणामहेओ सि ।
[जनेन सर्वदमनः इति कृतनामधेयः असि ।]

राजा—

किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः ।
नूनमनपत्यता*e* मां वत्सलयति ।

द्वितीया—

एसा खु केसरिणी तुमं लङ्घेदि, जइ से पुत्तअं ण
[एषा खलु केशरिणी त्वां लङ्घयति, यदि अस्य पुत्रकं न]
मुञ्चेसि ।
[मुञ्चसि ।]

a 1-1 previousl scorned

b 1-1 with the strength not of a child

c 2-1 having mane disordered by rough handling

d tease

e 1-1 childlessness

बालः—(सस्मितम्)

अम्हहे। बलिअं क्खु भीदो म्हि।

[अहो। बलीयः खलु भीतः अस्मि।]

(इत्यधरं दर्शयति)

राजा—

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।

स्फुलिङ्गावस्थया[a] वह्निरेधापेक्ष[b] इव स्थितः॥ १८१॥

प्रथमा—

वच्छ, एदं बालमिइन्दअं मुञ्च। अवरं दे कीलणअं[c]

[वत्स, एतं बालमृगेन्द्रकं मुञ्च। अपरं ते क्रीडनकं]

दाइस्सं।

[दास्यामि।]

बालः—

कहिं? देहि णं।

[कुत्र? देहि एनम्।]

(इति हस्तं प्रसारयति)

राजा—

कथं चक्रवर्तिलक्षणमप्यनेन[d] धार्यते। तथा ह्यस्य

प्रलोभ्यवस्तुप्रणयप्रसारितो[e]

विभाति जालग्रथिताङ्गुलिः[f] करः।

अलक्ष्यपत्रान्तरमिद्धरागया

नवोषसा भिन्नमिवैकपङ्कजम्॥ १८२॥

द्वितीया—

सुव्वदे, ण सक्को एसो वाआमेत्तेण विरमाविदुं। गच्छ।

[सुव्रते, न शक्यः एषः वाचामात्रेण विरमयितुम्। गच्छ।]

मम केरए उडए मक्कण्डेअस्स इसिकुमारअस्स वण्ण-

[मदीये उटजे मार्कण्डेयस्य ऋषिकुमारकस्य वर्ण-]

चित्तिदो मित्तिआमोरओ[g] चिट्ठदि। तं से उवहर।

[चित्रितः मृत्तिकामयूरकः तिष्ठति। तम् अस्य उपहर।]

प्रथमा—

तधा।

[तथा।]

(इति निष्क्रान्ता)

---

a 3-1 condition of a spark

b 1-1 waiting for fuel

c 2-1 toy

d 1-1 mark of universal monarch

e 1-1 stretched forth to get the object of attraction

f 1-1 with its fingers connected by a web

g 1-1 peacock made of clay

बालः—

इमिणा जेव्व दाव कीलिस्सं।
[अनेन एव तावत् क्रीडिष्यामि।]

(इति तापसीं विलोक्य हसति)

राजा—

स्पृहयामि*a* खलु दुर्ललितायास्मै*b*।
आलक्ष्यदन्तमुकुलाननिमित्तहासै*c*-
र्व्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्*d* वहन्तो
धन्यास्तदङ्गरजसा*e* मलिनीभवन्ति ॥१८३॥

तापसी—

होदु। ण मं अअं गणेदि। (पार्श्वमवलोकयति) को एत्थ
[भवतु। न माम् अयं गणयति। कः अत्र]
इसिकुमाराणं। (राजानमवलोक्य) भद्दमुह, एहि दाव।
[ऋषिकुमाराणाम्। भद्रमुख, एहि तावत्।]
मोएहि इमिणा दुम्मोअहत्थग्गाहेण*f* डिम्भलीलाए*g* बाहीअ-
[मोचय अनेन दुर्मोचहस्तग्राहेण डिम्भलीलया बाध्य-]
माणं बालमिइन्दअं।
[मानं बालमृगेन्द्रकम्।]

राजा—(उपगम्य। सस्मितम्)

अयि भो महर्षिपुत्र।
एवमाश्रमविरुद्धवृत्तिना
संयमः*h* किमिति जन्मनस्त्वया।
सत्त्वसंश्रयसुखोऽपि दूष्यते*i*
कृष्णसर्पशिशुनेव चन्दनम्*j* ॥१८४॥

तापसी—

भद्दमुह, ण क्खु अअं इसिकुमारओ।
[भद्रमुख, न खलु अयम् ऋषिकुमारकः।]

राजा—

आकारसदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात्तु*k* वय-
मेवंतर्किणः।

(यथाभ्यर्थितमनुतिष्ठन्*l* बालस्पर्शमुपलभ्य। आत्मगतम्)

अनेन कस्यापि कुलाङ्कुरेण*m*
स्पृष्टस्य गात्रेषु सुखं ममैवम्

a "स्पृह्" 'desire' takes the object in the dative case
b 4-1 difficult to please; wayward
c 3-3 innocent smiles through which buds of the teeth were visible
d 2-3 fondly soliciting a refuge in their lap
e 3-1 dust of their limbs
f 3-1 grasp of whose hand is difficult to unloosen
g 3-1 childish play
h 1-1 forbearance
i is violated
j 1-1 sandal tree
k 5-1 confidence created by the place
l acting as requested
m 3-1 scion of the family

कां निर्वृतिं*a* चेतसि तस्य कुर्या-
द्यस्यायमङ्गात्कृतिनः*b* प्ररूढः ॥१८५॥

तापसी—(उभौ निर्वर्ण्य)
अच्छरिअं अच्छरिअं।
[आश्चर्यम् आश्चर्यम्।]

राजा—
आर्ये, किमिव ?

तापसी—
इमस्स बालअरूवस्स दे वि संवादिणी*c* आकिदि त्ति
[अस्य बालकरूपस्य ते अपि संवादिनी आकृतिः इति]
विम्हिद म्हि। अपरिइदस्स वि दे अप्पडिलोमो*d*
[विस्मिता अस्मि। अपरिचितस्य अपि ते अप्रतिलोमः]
संवुत्तो त्ति।
[संवृत्तः इति।]

राजा—(बालमुपलालयन्*e*)
न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः ?

तापसी—
पुरुवंसो।
[पुरुवंशः।]

राजा—(आत्मगतम्)
कथमेकान्वयो मम*f*। अतः खलु मदनुकारिणमेनमत्रभवती
मन्यते। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्*g*।
भवनेषु रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि*h* पश्चा-
त्तरुमूलानि गृहीभवन्ति*i* तेषाम् ॥१८६॥
(प्रकाशम्)
न पुनरात्मगत्या मानुषाणामेष विषयः*j*।

तापसी—
जधा भद्दमुहो भणादि। अच्छरासम्बन्धेण इमस्स जणणी
[यथा भद्रमुखः भणति। अप्सरासंबन्धेन अस्य जननी]
एत्थ देवगुरुणो तवोवणे पसूदा।
[अत्र देवगुरोः तपोवने प्रसूता।]

राजा—(अपवार्य)
हन्त द्वितीयमिदमाशाजननम्*k*। (प्रकाशम्) अथ सा तत्रभवती
किमाख्यस्य राजर्षेः पत्नी ?

a 2-1 bliss
b 6-1 blessed
c resembling
d 1-1 not averse
e fondling the boy
f How strange ! He belongs to the same race as I !
g 1-1 family-vow
h 1-3 rigidly observing the one vow of ascetics
i serve as homes
j 1-1 place

तापसी—

को तस्स धम्मदारपरिच्चाइणो[a] णाम सङ्कित्तिदुं
[कः तस्य धर्मदारपरित्यागिनः नाम संकीर्तितुं]
चिन्तिस्सदि।
[चिन्तयिष्यति।]

राजा—(स्वगतम्)

इयं खलु कथा मामेव लक्षीकरोति[b]। यदि तावदस्य शिशोर्मातरं नामतः पृच्छेयम्। (विचिन्त्य) अथवा, अनार्यः परदारपृच्छाव्यापारः[c]।

तापसी—(प्रविश्य मृन्मयूरहस्ता)

सव्वदमण, सउन्दलावण्णं[d] पेक्ख।
[सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व।]

बालः—(सदृष्टिक्षेपम्)

कहिं वा मे अम्बा ?
[कुत्र वा मे अम्बा ?]

उभे—

णामसारिस्सेण[e] वञ्चिदो माउवच्छलो।
[नामसादृश्येन वञ्चितः मातृवत्सलः।]

द्वितीया—

वच्छ, इमस्स मित्तिआमोरअस्स रम्मत्तणं[f] पेक्ख त्ति
[वत्स, अस्य मृत्तिकामयूरकस्य रम्यत्वं प्रेक्षस्व इति]
भणिदो सि।
[भणितः असि।]

राजा—(आत्मगतम्)

किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो[g] मे विषादाय कल्पते।

बालः—

अज्जुए, लोअदि मे एसो भद्दमोलओ।
[आर्यके, रोचते मे एषः भद्रमयूरकः।]

(इति क्रीडनकमादत्ते[h])

प्रथमा—(विलोक्य। सोद्वेगम्)

अम्हहे, रक्खागण्डओ[i] से मणिबन्धे[j] ण दीसदि।
[अहो, रक्षाकरण्डकः अस्य मणिबन्धे न दृश्यते।]

[a] 6-1 repudiater of his lawful wife

[b] alludes to

[c] 1-1 talking about another's wife

[d] 2-1 beauty of the bird

[e] 3-1 similarity of sound (name)

[f] 2-1 beauty

[g] 1-1 mentioning of the mere name

[h] take the toy

[i] 1-1 the magical string cf. Panj. गंडा

[j] 7-1 wrist

राजा—

अलमलमावेगेन । नन्विदमस्य सिंहशावविमर्दात्[a] परिभ्रष्टम् ।

(इत्यादातुमिच्छति)

उभे—

मा खु मा खु एदं अविलम्बिअ । कधं । गहिदं णेण ?
[मा खलु मा खलु एतद् अविलम्ब्य । कथं । गृहीतम् अनेन ?]

(इति विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः)

राजा—

किमर्थं प्रतिषिद्धाः स्मः ।

प्रथमा—

सुणादु महाराओ । एसा अवराइदा णाम ओसही[b] इमस्स
[शृणोतु महाराजः । एषा अपराजिता नाम ओषधिः अस्य]
जादकम्मसमए[c] भअवदा मारीएण दिण्णा । एदं किल
[जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल]
मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण
[मातापितरौ आत्मानं च वर्जयित्वा अपरः भूमिपतितां न]
गेण्हदि ।
[गृह्णाति ।]

राजा—

अथ गृह्णाति ?

प्रथमा—

तदो तं सप्पो भविअ दंसदि ।
[ततः तं सर्पः भूत्वा दशति ।]

राजा—

भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता[d] विक्रिया[e] ?

उभे—

अणेअसो ।
[अनेकशः ।]

राजा— (सहर्षम् । आत्मगतम्)

कथमिव संपूर्णमपि मे मनोरथं नाभिनन्दामि ।

(इति बालं परिष्वजते)

द्वितीया—

सुव्वदे, एहि । इमं वुत्तन्तं णिअमव्वावुदाए[f] सउन्दलाए]
[सुव्रते, एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै]
णिवेदेम्ह ।
[निवेदयावः ।]

(इति निष्क्रान्ते)

a 5-1 affray with the lion's cub

b herb named *Aparajita* (undefeated

c 7-1 occasion of the natal ceremony

d 1-1 witnessed; observed

e 1-1 transformation

f 4-1 engaged in vows

बालः—

मुञ्च मं । जाव अम्बाए सआसं गमिस्सं ।
[मुञ्च माम् । यावद् अम्बायाः सकाशं गमिष्यामि ।]

राजा—

पुत्रक, मया सहैव मातरमभिनन्दयिष्यसि ।]

बालः—

मम क्खु तादो दुस्सन्दो । ण तुमं ।
[मम खलु तातः दुष्यन्तः । न त्वम् ।]

राजा—(सस्मितम्)

एष विवाद एव प्रत्याययति[a] ।

(ततः प्रविशत्येकवेणीधरा शकुन्तला)

शकुन्तला—

विआरकाले[b] वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ
[विकारकाले अपि प्रकृतिस्थां सर्वदमनस्य ओषधिं श्रुत्वा]
ण मे आसा आसि अत्तणो भाअहेएसु । अथवा जधा
[न मे आशा आसीत् आत्मनः भागधेयेषु । अथवा यथा]
साणुमदीए आचक्खिदं, तधा सम्भावीअदि एदं ।
[सानुमत्या आचष्टम्, तथा संभाव्यते एतद् ।]

राजा—(शकुन्तलां विलोक्य)

अये, सेयमत्रभवती शकुन्तला । यैषा

वसने परिधूसरे[c] वसाना
नियमक्षाममुखी[d] धृतैकवेणिः[e] ।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति ॥१८७॥

शकुन्तला—(पश्चात्तापविवर्णं[f] राजानं दृष्ट्वा)

ण क्खु अज्जउत्तो विअ । तदो को एसो दाणिं किद-
[न खलु आर्यपुत्रः इव । ततः कः एषः इदानीं कृत-]
रक्खामङ्गलं दारअं[g] मे गत्तसंसग्गेण दूसेदि[h] ।
[रक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति ।]

बालः—(मातरमुपेत्य)

अम्ब, को एसो पुलिसो मं पुत्त त्ति आलिङ्गदि ?
[अम्ब, कः एषः पुरुषः मां पुत्र इति आलिङ्गति ?]

a Even this controversy convinces me.
b 7-1 time of metamorphose
c 2-2 dusky
d 1-1 with her face emaciated by (her) observance of vows
e 1-1 bearing a single braid of hair
f 2-1 pale from repentance
g 2-1 son
h pollutes

राजा—

प्रिये, क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं*a* संवृत्तम्, यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि।

शकुन्तला—(आत्मगतम्)

हिअअ, समस्सस समस्सस। परिच्चत्तमच्छरेण*b* अणुअम्पिद म्हि देव्वेण। अज्जउत्तो क्खु एसो।

[हृदय, समाश्वसिहि समाश्वसिहि। परित्यक्तमत्सरेण अनुकम्पिता अस्मि दैवेन। आर्यपुत्रः खलु एषः।]

राजा—

प्रिये,

स्मृतिभिन्नमोहतमसो*c* दिष्ट्या प्रमुखे स्थितासि मे सुमुखि।
उपरागान्ते*d* शशिनः समुपगता रोहिणी*e* योगम्॥ १८८॥

शकुन्तला—

जेदु जेदु अज्जउत्तो।

[जयतु जयतु आर्यपुत्रः।]

(इत्यर्धोक्ते वाष्पकण्ठी विरमति)

राजा—

सुन्दरि,

वाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत्ते दृष्टमसंस्कारं*f* पाटलोष्ठपुटं मुखम्॥१८९॥

बालः—

अम्ब, को एसो?

[अम्ब, कः एषः?]

शकुन्तला—

वच्छ, दे भाअहेआइं पुच्छ।

[वत्स, ते भागधेयानि पृच्छ।]

राजा—(शकुन्तलायाः पादयोः प्रणिपत्य)

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु*g* ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया*h*॥ १९०॥

शकुन्तला—

उट्ठेदु अज्जउत्तो। णूणं मे सुअरिदप्पडिबन्धअं पुराकिदं

[उत्तिष्ठतु आर्यपुत्रः। नूनं मे सुचरितप्रतिबन्धकं पुराकृतं]

a 1-1 having favourable result

b 3-1 whose jealousy is gone

c 6-1 darkness of whose infatuation is removed by the revival of memory

d at the end of an eclipse

e 1-1 name of the fourth lunar constellation

f 1-1 having no decoration

g 1-1 sorrow caused by repudiation

h 3-1 mistaking (it) for a serpent

तेसु दिअसेसु परिणामाहिमुहं आसि । जेण साणुक्कोसो
[तेषु दिवसेषु परिणामाभिमुखम् आसीत् । येन सानुक्रोशः]
वि अज्जउत्तो मइ विरसो*a* संवुत्तो । (राजोत्तिष्ठति) अध
[अपि आर्यपुत्रः मयि विरसः संवृत्तः । अथ]
कधं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ?
[कथम् आर्यपुत्रेण स्मृतः दुःखभागी अयं जनः ?]

राजा—

उद्धृतविषादशल्यः*b* कथयिष्यामि ।

मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो बाष्पबिन्दुरधरं परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
बाष्पं प्रमृज्य विगतानुशयो*c* भवेयम् ॥ १६१ ॥

(इति यथोक्तमनुतिष्ठति)

शकुन्तला—(नाममुद्रां दृष्ट्वा)

अज्जउत्त, एदं तं अङ्गुलीअअं ।
[आर्यपुत्र, एतद् तद् अङ्गुलीयकम् ।]

राजा—

अस्मादङ्गुलीयोपलम्भात्खलु स्मृतिरुपलब्धा ।

शकुन्तला—

विसमं किदं णेण । जं तदा अज्जउत्तस्स पच्चाअणकाले*d*
[विषमं कृतम् अनेन । यद् तदा आर्यपुत्रस्य प्रत्यायनकाले]
दुल्लहं आसि ।
[दुर्लभम् आसीत् ।]

राजा—

तेन ह्यृतुसमवायचिह्नं*e* प्रतिपद्यतां लता कुसुमम् ।

शकुन्तला—

ण से विस्ससामि । अज्जउत्तो जेव्व णं धारेदु ।
[न अस्मै विश्वसामि । आर्यपुत्रः एव एतद् धारयतु ।]

(ततः प्रविशति मातलिः)

मातलिः—

दिष्ट्या । धर्मपत्नीसमागमेन*f* पुत्रमुखदर्शनेन चायुष्मान् वर्धते ।

राजा—

अभूत् संपादितस्वादुफलो मे मनोरथः । मातले, न खलु
विदितोऽयमाखण्डलेन वृत्तान्तः स्यात् ।

a 1-1 indifferent

b 1-1 having the dart of grief extracted (from my bosom)

c 1-1 free from remorse

d 7-1 the time of convincing

e as a mark of its union with the season

f 3-1 union with lawful wife

मातलिः—(सस्मितम्)

किमीश्वराणां परोक्षम्[a] । एत्वायुष्मान् । भगवान्मारीचस्ते दर्शनं वितरति ।

राजा—

शकुन्तले, अवलम्ब्यतां पुत्रः । त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि ।

शकुन्तला—

जिहिरिआमि[b] अज्जउत्तेण सह गुरुसमीवं गन्तुं ।
[जिह्रेमि आर्यपुत्रेण सह गुरुसमीपं गन्तुम् ।]

राजा—

अयि । आचरितव्यमेतदभ्युदयकालेषु । एह्येहि ।

(सर्वे परिक्रामन्ति)

(ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः)

मारीचः—(राजानमवलोक्य)

दाक्षायणि[c],

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता ।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत्[d] कुलिशमाभरणं मघोनः ॥ १६२ ॥

अदितिः—

सम्भावणीआणुभावा[e] से आकिदी ।
[संभावनीयानुभावा अस्य आकृतिः ।]

मातलिः—

आयुष्मन्, एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः । तावुपसर्प ।

राजा—

मातले, एतौ

प्राहुर्द्वादशधास्थितस्य[f] मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम् ।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरम् ॥ १६३ ॥

मातलिः—

अथ किम् ।

a what is out of the ken of mighty lords ?

b I feel ashamed

c 8-1 name of *Aditi*,

d 1-1 sharp-edged

e 1-1 having its dignity inferrable

f 9-1 subsisting in twelve forms

राजा—(प्रणिपत्य)

उभाभ्यामपि वासवानुयोज्यो[a] दुष्यन्तः प्रणमति ।

मारीचः—

वत्स, चिरं जीव । पृथिवीं पालय ।

अदितिः—

वच्छ, अप्पडिरधो[b] होहि ।
[वत्स, अप्रतिरथः भव ।]

शकुन्तला—

दारअसहिदा वो पादवन्दणं करेमि[c] ।
[दारकसहिता वां पादवन्दनं करोमि ।]

मारीचः—

वत्से,
आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः ।
आशीरन्या न ते योग्या पौलोम्या[d] सदृशी भव ॥ १६४ ॥

अदितिः—

जादे, भत्तुणो बहुमदा होहि । अवस्सं दीहाऊ वच्छओ
[जाते, भर्तुः बहुमता भव । अवश्यं दीर्घायुः वत्सः]
उहअकुलणन्दणो[e] होदु । उवविसध ।
[उभयकुलनन्दनः भवतु । उपविशत ।]

(सर्वे प्रजापतिमभित उपविशन्ति)

मारीचः—(एकैकं निर्दिशन्)
दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम् ॥ १६५ ॥

राजा—

भगवन्, प्रागभिप्रेतसिद्धिः । पश्चाद्दर्शनम् । अतोऽपूर्वः खलु वोऽनुग्रहः । कुतः,
उदेति पूर्वं कुसुमं ततः फलं
घनोदयः[f] प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु संपदः ॥ १६६ ॥

मातलिः—

एवं विधातारः प्रसीदन्ति ।

राजा—

भगवन्, इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिश-

[a] 1-1 Indra's servant
[b] 1-1 match-less ; insurmountable
[c] I salute you
[d] 3-1 wife of Indra
[e] 1-1 delight of both families
[f] 1-1 rising of clouds

अपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य(a) कण्वस्य । पश्चादङ्गुलीयकदर्शनादूढपूर्वां तद्दुहितरमवगतोऽहम् । तच्चित्रमिव मे प्रतिभाति ।

यथा गजो नेति समक्षरूपे
तस्मिन्नतिक्रामति संशयः स्यात् ।
पदानि दृष्ट्वा तु भवेत्प्रतीति-
स्तथाविधो मे मनसो विकारः ॥ १६७ ॥

मारीचः—

वत्स, अलमात्मापराधशङ्कया । सम्मोहो(b)ऽपि त्वय्यनुपपन्नः । श्रूयताम् ।

राजा—

अवहितोऽस्मि ।

मारीचः—

यदैवाप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां(c) शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि— दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी(d) त्वया प्रत्यादिष्टा नान्यथेति' । स चायमङ्गुलीयकदर्शनावसानः ।

राजा—(सोच्छ्वासम्)

एष वचनीयान्मुक्तोऽस्मि(e) ।

शकुन्तला—(स्वगतम्)

दिट्ठिआ । अकारणपच्चादेसी(f) ण अज्जउत्तो । ण क्खु
[दिष्ट्या । अकारणप्रत्यादेशी न आर्यपुत्रः । न खलु]
सत्तं(g) अत्ताणं सुमरेमि । अथवा पत्तो मए स हि सावो
[शप्तम् आत्मानं स्मरामि । अथवा प्राप्तः मया सः हि शापः]
विरहसुण्णहिअआए ण विदिदो । जदो सहीहिं सन्दिट्ठ
[विरहशून्यहृदयया न विदितः । यतः सखीभ्यां सन्दिष्टा]
म्हि 'भत्तुणो अङ्गुलीअअं दंसइदव्वं त्ति ।'
[अस्मि 'भर्तुः अङ्गुलीयकं दर्शयितव्यम् इति ।']

मारीचः—

वत्से, चरितार्थासि(h) । सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः । पश्य ।

शापादसि प्रतिहता स्मृतिरोधरूक्षे(i)
भर्तर्यपेततमसि प्रभुता तवैव ।

a 6-1 having the same family name as you ; your kins-man

b 1-1 mental delusion

c 2-1 bearing evident signs of distress

d 1-1 consort in religious duties

e 5-1 blame

f 1-1 one who repudiates without cause

g 2-1 cursed

h you have gained your object

i 7-1 harsh owing to the obstruction of his memory

छाया न मूर्छति मलोपहतप्रसादे[a]
शुद्धे तु दर्पणतले[b] सुलभावकाशा ॥१६८॥

राजा—

भगवन्, अत्र[c] खलु मे वंशप्रतिष्ठा।

(इति बालं हस्तेन गृह्णाति)

मारीचः—

तथाभाविनमेनं चक्रवर्तिनमवगच्छतु भवान्। पश्य।

रथेनानुद्घातस्तिमितगतिना[d] तीर्णजलधिः
पुरा सप्तद्वीपां[e] जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात्[f] सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥१६९॥

राजा—

भगवता कृतसंस्कारे सर्वमस्मिन्वयमाशास्महे।

अदितिः—

भअवं, इमाए दुहिदुमणोरधसम्पत्तीए कण्णो वि दाव
[भगवन्, अस्याः दुहितृमनोरथसंपत्तेः कण्वः अपि तावत्]
सुदवित्थारो करीअदु। दुहिदुवच्छला मेणआ इध जेव्व
[श्रुतविस्तारः क्रियताम्। दुहितृवत्सला मेनका इह एव]
मं परिचरन्ती चिट्ठदि।
[मां परिचरन्ती तिष्ठति।]

शकुन्तला—(आत्मगतम्)

मणोरधो क्खु मे भणिदो भअवदीए।
[मनोरथः खलु मे भणितः भगवत्या।]

मारीचः—

तपःप्रभावात्प्रत्यक्षं सर्वमेव तत्रभवतः।

राजा—

अतः खलु ममानतिक्रुद्धो मुनिः[g]।

मारीचः—

तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः। कः कोऽत्र भोः?

शिष्यः—(प्रविश्य)

भगवन्, अयमस्मि।

मारीचः—

गालव, इदानीमेव विहायसा गत्वा मम वचनात्तत्रभवते कण्वाय प्रियमावेदय 'यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति'।

---

a 7-1 having its brightness tarnished by dirt

b 7-1 surface of a mirror

c in this i. e. Sakuntala's son Bharata

d 3-1 with its motion steady owing to absence of jolts

e 2-1 consisting of seven islands

f 5-1 forcibly taming

g hence, indeed, the sage did not get indignant with me.

शिष्यः—

यदाज्ञापयति भगवान् ।

(इति निष्क्रान्तः)

मारीचः—

वत्स, त्वमपि स्वापत्यदारसहितः सख्युराखण्डलस्य रथमारुह्य ते राजधानीं प्रतिष्ठस्व ।

राजा—

यदाज्ञापयति भगवान् ।

मारीचः—

अपि च ।

तव भवतु बिडौजाः *a* प्राज्यवृष्टिः *b* प्रजासु
त्वमपि विततयज्ञः *c* स्वर्गिणः प्रीणयालम् ।
युगशतपरिवर्तानेवमन्योन्यकृत्यै-
र्नयतमुभयलोकानुग्रहश्लाघनीयैः *d* ॥२००॥

राजा—

भगवन्, यथाशक्ति श्रेयसे यतिष्ये ।

मारीचः—

वत्स, किं ते भूयः प्रियमुपहरामि ।

राजा—

अतः परमपि प्रियमस्ति । यदिह भगवान् प्रियं कर्तुमिच्छति तर्हीदमस्तु (भरतवाक्यम्)।

प्रवर्ततां प्रकृतिहिताय *e* पार्थिवः
सरस्वती श्रुतिमहतां *f* महीयताम् ।
ममापि च क्षपयतु *g* नीललोहितः
पुनर्भवं *h* परिगतशक्तिरात्मभूः *i* ॥२०१॥

(इति निष्क्रान्ताः सर्वे)

॥ इति सप्तमोऽङ्कः ॥

॥ समाप्तमिदमभिज्ञानशकुन्तलं नाम नाटकम् ॥

॥ शुभं भूयात् ॥

a 1-1 *Indra*
b 1-1 bountiful of rain
c 1-1 abundantly performing sacrifices
d 3-3 laudable on account of the favours (conferred) on both worlds
e 4-1 welfare of (his) subjects
f 6-3 mighty in the scriptures
g may he put an end
h 2-1 re-birth
i 1-1 having energy everywhere diffused

EXPLANATORY NOTES.

Page 1.

नान्द्यन्ते—At the end of *Nandi*. Nandi is a technical term in dramas. Literally it means anything that pleases as it is derived from the root नन्द् to please. [नन्दन्ति देवा: अत्र; नन्दति परिषद् अत्र इति वा घञ् पृषोदरत्वात् वृद्धिः ङीप्]॥ नाट्यप्रदीप, a work on dramaturgy defines नान्दी as " आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः । नान्दीति कथ्यते ... ।" नान्दी is a stanza having a double meaning. On the one hand, it refers to the chief events of the plot, and, on the other hand, it invokes a blessing on the audience, or offers worship to the local dieties. The recitation of this verse is also accompanied by musical नान्दी which consists of twelve kinds of musical instruments, *viz*., ' भंभा-मुकुंद-मद्दल-कडम्ब-झल्लरिहुडुक्क-कंसाला । काहल-तलिमा वंसो संखो पणवो य बारसमो ।" मलयगिरि on Nandi-Sutra. The same authority derives नन्दी as follows :—टुनदु समृद्धौ इत्यस्य 'धातोरुदितो' नम इति नमि विहिते नन्दनं नन्दिः प्रमोदो हर्षः । नन्दन्ति प्राणिनः अनेन अस्मिन् वा नन्दिः ; सर्वधातुभ्यः इति औणादिकः प्रत्ययः अपरे तु नन्दी इति पठन्ति । ते च 'इक्कृष्यादिभ्य, इति सूत्रात् इक् प्रत्ययं समानीय स्त्रीत्वे अपि नन्दी वर्तयन्ति. ततः च 'इतोऽक्त्यर्थात्' इति ङीप्रत्ययः । These rules refer to *Hemacandra's* grammar. The नन्दी described here is of four kinds, *viz*., नामनन्दी, स्थापनानन्दी, द्रव्यनन्दी and भावनन्दी. For details see मलयगिरि p. 2. For our purposes नन्दी is the same as नान्दी. Every Hindu drama opens with नान्दी and is said to be employed for the removal of obstacles.

सूत्रधार—(*Lit*. the holder of the thread through which the various incidents of the plot are strung.) Manager or chief actor who governs the stage, and takes a prominent part in the प्रस्तावना or prelude. He is thus defined :—नाट्यस्य यदनुष्ठानं तत् सूत्रं स्यात् सबीजकम् । रंगदैवतपूजाकृत् सूत्रधार इति स्मृतः ॥

अभिज्ञानशकुन्तलम्-शकुन्तैः पक्षिविशेषैः लाता रक्षिता शकुन्तला । *Sakuntala* is so called because she was reared for some time by *Sakunta* birds after she had been deserted by her parents. अभिज्ञायते अनेन इति अभिज्ञानम् a sign of recognition : here the ring. अभिज्ञानेन स्मृता (or ज्ञाता) शकुन्तला *Sakuntala* recognised by the token ring. ताम् अधिकृत्य कृतं नाटकम् अभिज्ञानशकुन्तलम्. The drama written with reference to her is called *Abhijana-Sakuntlam*. Another variant of the title of the play is अभिज्ञानशाकुन्तलम् hich also could be defended gramatically.

Page 2.

दुष्यन्त—A king of the Lunar dynasty. Another form of his name is दुष्मन्त.

प्रस्तावना—is an introduction with which the stage-manager, often accompanied by his wife, opens the play, briefly referring to the author and the plot.

Page 3.

अङ्क—One of the parts into which a drama is divided, corresponding to an act of English dramas.

पिनाकिनम्—पिनाक: अस्य अस्ति इति पिनाकी *Siva* is called पिनाकिन् *i.e.*, "armed with a trident"; or according to some "armed with bow named *Pinaka*." Siva, not being invited to *Daksha's* sacrifice, was so indignant, that, with his wife, he suddenly presented himself, confounded the sacrifice, dispersed the gods, and chasing Yajna, the lord of sacrifice, who fled in the form of a deer, overtook and decapitated him."

Page 4.

पुरु—More often spelt as पूरु was a distant ancestor of *Dushyanta*. He was so famous that his descendants came to be known as *Pauravas*.

मालिनी—also called मन्दाकिनी is a tributary of the Ganges now called पैशुना running in the vicinity of *Hastinapur*.

Page 5.

कुलपति—A sage who feeds and teaches ten thousand pupils, and provides them with board and lodging. मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥

सोम तीर्थ—is another of name प्रभास , a place of pilgrimage on the coast of Gujrat Kathiawar.

Page 8.

सयंवर (Skt. स्वयंवर) "selection for one's self" was a form of marriage in which a princess selected publicly a husband from among a number of assembled suitors.

Page 10.

असवर्णक्षेत्रसंभवा—A Brahmana was allowed to marry wives from all the four castes, a Kshatriya from the three *i.e.*, Kshatriya, Vaisya and Sudra. But a Kshatriya could marry a girl sprung from a Brahmana father and a Kshatriya mother. Therefore he conjectures that *Sakuntala* must be the daughter of *Kanva* from a Kshatriya wife, else how could he be possessed of a liking for her, because otherwise his marriage with *Sakantala* would be illegal. As a matter of fact she was born of a Kshatriya father (the royal sage विश्वामित्र) and the celestial nymph मेनका and consequently she was quite elegible to become his queen.

Page 11.

अर्घ—was a respectful offering to Brahmans and guests of rice, Durva, grass, flowers, fruit, etc., with water in a small boat-shaped vessel.

Page 19.

चीनांशुक—A fine silk-cloth imported from China.

Page 25.

सूर्यकान्ता—A kind of stone or crystal which emits light and heat when exposed to the sun's rays. A similar crystal is चन्द्रकान्ता which emits drops of water if exposed to the moon. सूर्यकान्ता might have been a kind of lens known to the ancient Hindus.

किदं भवदा दाणिं णिम्मच्छिअं—(The place) has now been made clear of flies by Your Majesty. मच्छिआ (मक्षिका) has perhaps an allusion to the Greek female attendants who hung about the king like flies.

Page 26.

अणब्भत्थणीआ—It was not allowed for a Kshatriya to marry a hermit's daughter.

सुरजुवतिसंभव—offspring of a heavenly damsel. Once विश्वामित्र was engaged in practising severe austerities. *Indra* being afraid lest विश्वामित्र might usurp his throne by his successful austerities, sent down the celestial nymph मेनका to disturb him. The sage was captivated by *Menaka's* beauty as a result of which *Menaka* gave birth to *Sakuntla*.

Page 28.

णीवारछट्ठभाअं—*Manu* says that a king might levy as tax one-sixth part of the produce, be it grain liquids, fruits, etc. But even though dying with want, he should not levy any tax from hermits and learned Brahmanas. नीवार is wild rice upon which the hermits live. विदूषक here jokingly suggests that the king might levy a tax equal to one-sixth of the नीवार produce from the hermits.

Page 31.

तिसङ्कु (त्रिशङ्कु)—He was the father of the celebrated king *Hariscandra* of *Ayodhya*. He was a good king and loved his person to an excess. Desiring to celebrate a sacrifice by which he might go up to heaven in his mortal body, he requested his priest वसिष्ठ to officiate for him. But being refused, he next requested Vasishtha's sons who likewise refused and cursed him to become a चाण्डाल. Then he approached विश्वामित्र with the same request which was accepted by the latter. A sacrifice was commenced but no gods would come to take part in it as त्रिशङ्कु, had become a चाण्डाल. Thereupon the enraged विश्वामित्र by his own power lifted up त्रिशङ्कु with his cherished mortal body. When he had reached the vault of heaven, *Indra* hurled him down. But विश्वामित्र supported him saying, "stay त्रिशङ्कु", and the monarch remained suspended as a constellation in the southern hemisphere. Hence the well known proverb त्रिशङ्कुरिवान्तरा तिष्ठ ।

Page 32.

महाब्राह्मण—This use of महत् (महा) in the compound महाब्राह्मण is ironical as it implies censure. तैले शंखे · · · महच्छब्दो न दीयते । The word महत् when added before oil etc., gives a censurable sense. But the term is sufficiently flattering to the simple minded *Vidushaka* who is unable to mark the irony in it.

जुवराओ—(युवराजः)—The young prince formally admitted to a share in the government and associated with the reigning monarch.

Page 33.

विष्कम्भ—is a monologue or dialogue between minor

actors to convey to the audience such part of the story as is not represented on the stage but has an important connection with the preceding and the following incidents.

ऋत्विज्—(ऋतौ यजति इति ऋत्विग्). One who sacrifices at the proper time; a priest officiating at a sacrifice.

हरकोपवह्नि—alludes to the destruction of कामदेव by Siva with a flash of fire darting from his third eye when the former had entered into the latters' penance grove to cause disturbance in his mind so that he might marry *Parvati*. *Cf*. Kumarasambhava 3—72.

Page 37.

श्रवणकातरता—(uneasiness or anxiety for hearing her reply) The king was afraid lest *Shakuntala* expressed some other cause for her indisposition than love for him.

अएणआ...तिलोदअं—This sentence alludes to the rite of performing a श्राद्ध in the name of deceased relative. It consisted in offering a ball of rice, flour, and milk or in pouring out water and sesamum seed mixed. It has become a proverbial saying and means " take me to be dead."

Page 38.

विशाखे शशाङ्कलेखामनुवर्तेते—The विशाखा constellation consists of two stars. The word विशाखे here refers to the two friends of *Sakuntala* and शशाङ्कलेखा to *Sakuntala* herself.

Page 43.

गान्धर्वेण विवाहेन—One of the eight forms of marriage. ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः। It is a marriage which is entirely the outcome of mutual love of the pair and is concluded without the performance of any ceremony. For Kshatriya it is the best recommended form.

Page 44.

चक्रवाकवधुए—the female चक्रवाक bird. The male and female of these birds keep together during the day and are patterns of constancy and connubial affection. But the legend is that they are doomed to pass the night apart in consequence of a curse by some saint. Accordingly as soon

as night commences they take up their station on opposite banks of a river, and call to each other pitious cries.

Page 47.

सोहग्गदेवदा—(सौभाग्यदेवता) The deity presiding over good fortune of a married woman सौभाग्य that is the union with her husband (Hindi सुहाग).

Page 50.

अग्गसञ्झा—सन्ध्या generally means the juncture of day and night that is morning and evening twilight. अग्रसन्ध्या means the morning.

Page 52.

सुसिस्सपरिदिण्णा ... संवुत्ता—(सुशिष्यपरिदत्ता .. संवृत्ता). In ancient times a teacher did not impart learning to an undeserving student; for it was a belief that knowledge given to an unworthy pupil became a cause of anxiety for the teacher. *Yaska*, the author of the *Nirukta* who flourished about the fifth century B. C. says :—विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि । असूयकायानृजवेऽयताय मा ब्रूया वीर्यवती तथा स्याम् ।

Page 53.

संस्कृतमश्रित्य—Female characters in a Sanskrit drama are not allowed to speak Sanskrit but when they are to repeat the words of a Sanskrit-speaking character they can do so.

शमीमित्त —(like *Sami*-wood). The legend is that the goddess पार्वती, being one day under the influence of strong passion, reposed on a trunk of this tree, whereby an intense heat was generated in the pith or interior of the wood, which ever afterwards broke into a sacred flame on the slightest attrition. M. W.

मङ्गलसमालम्भणाणि—(मङ्गलसमालम्भनानि). मङ्गलसमालम्भन is the act of smearing the body with coloured perfumes, such as saffron, sandal, &c.; the plural is here used for the unguents themselves, which are said to be *mangala* 'conductive to good fortune.'

Page 56.

लाक्षारसः—A red dye prepared from an insect, analogous to the cochinial insect. This minute red insect is found in great numbers in पलाश, Indian fig-tree, and some other trees. It punctures the bark whence exudes a resinous milky juice, with which it surrounds itself in a kind of nest, and which when dry may be broken off, and used for various purposes.

Page 57.

शर्मिष्ठा—was the daughter of वृषपर्वन् king of the demons and co-wife of देवयानी, the daughter of शुक्राचार्य Though originally sent with देवयानी as her maid in attendance, शर्मिष्ठा by her superior charms and accomplishments soon won the heart of ययाति and afterwards became his beloved queen. *Sarmishtha's* was a love-marriage (गान्धर्वविवाह) like that of *Sakuntala*.

पुरु—He was an ancestor of दुष्यन्त and is famous for an act of filial piety. He was a son of ययाति from his wife शर्मिष्ठा. Once ययाति was cursed by शुक्राचार्य to become prematurely old but was allowed afterwards to transfer his decrepitude to any one of five sons who would take it. पुरु alone consented to make the exchange. After a thousand years ययाति restored to पुरु his youth and beauty and conferred on him a boon that he would be the ancestor of a great ruling family.

प्रदक्षिणीकुरुष्व—प्रदक्षिणीकृ is to walk round an object of veneration on meeting it, keeping the right side always towards it. It is a form of paying respect.

ऋषिश्छन्दसाशास्ते—This particular verse is a kind of त्रिष्टुभ् चतुष्पदा, a form of Vedic metre consisting of eleven syllables to each पाद, but it is not regular.

Page 62.

पिअंवदामिस्साओ The word मिश्र is added to a noun to denote respect. पिअंवदामिस्साओ would mean the respected friend *Priyamwada* and others.

Page 63.

युगान्तरमारूढः—युग is a measurement of length and time. In the former sense it is equal to four cubits (हस्तचतुष्क). In the latter sense it is equal to three hours (a प्रहर). The meaning of the phrase seems to be that the sun has sufficiently risen high, *viz.*, it is noon.

Page 67.

उपाध्याय—A teacher who subsists by teaching a part of the *Veda* or *Vedangas*, grammar, etc. He is distinguished from an आचार्य who is wholly a spiritual teacher investing his pupils with the 'sacred thread' and giving them instructions in the *Vedas*.

वैतालिक—was a bard or herald who announced the appropriate time for a king's duties.

Page 79.

श्याल—or स्याल means 'wife's brother'. In dramas it generally means a king's brother-in-law introduced as a police officer. He is full of foolishness and vanity.

Page 80.

शोत्तिए—(श्रोत्रिय) A Brahman versed in the *Vedas*. जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ।

Page 103.

अव्वम्हरणं—(अब्रम्हरायम्) An unbrahmanical or sacrilegious act, used as an exclamation, meaning "help", "help" "a disgraceful deed is being perpetrated".

Page 104.

केनात्तगन्धो माणवकः—आत्तगन्ध. is equal to आत्तगर्व आत्त (आदत्त) taken away, गर्व means pride. The whole word आत्तगन्ध means 'whose pride is taken away', hence 'humble; insulted'. माणवक (a small man) is a name of विदूषक।

Page 105.

हंसो हि क्षीरमादत्ते—It is an old belief that a Swan can separate milk from a mixture of water. The explanation is given by Malayagiri in his commentary on the नन्दीसूत्र। ननु हंसः क्षीरमुदकामिश्रितमपि कथं विभक्ती करोति ? येन क्षीरमेव केवलमापिबति । न तूदकमिति। उच्यते, तज्जिह्वाया अम्लत्वेन क्षीरस्य कूर्चिकीभूय पृथग्भवनात् ॥

Page 106.

कालनेमि—He was the son of the demon हिरण्यकशिपु and had a hundred arms and as many heads.

नारद्—He is a celebrated divine sage or ब्रह्मर्षि. He acts as a kind of messenger of the gods. His chief characteristic is that he takes delight in causing quarrel between two parties. He is supposed to be ever-alive चिरंजीवी.

Page 107.

पुरुषकेशरिणः—पुरुषकेशरिन् नरसिंह "the man-lion". *Vishnu* assumed the form of a creature half man, half lion which was his fourth incarnation to deliver the worlds from the tyranny of an insolent demon called हिरण्यकशिपु, the father of प्रह्लाद.

Page 108.

द्वितीयहरिविक्रमनिस्तमस्कम्—(having its darkness expelled by the second stride of विष्णु). The story of Vishnu's second stride was this—An Asura named बली a descendant of हिरण्यकशिपु had, by his devotions, gained the dominion of Heaven, Earth, and Patala. विष्णु undertook to trick him out of his power and assuming the form of वामन, he appeared before बली nts, and begged, as a boon, as much land as he could pace in three steps. This was granted, and the god immediately expanded himself till he filled the world, deprived बली at the first step, of earth; at the second, of heaven; but in consideration of some merit left पाताल still under his rule.—M. W.

———

श्लोकसूची।